

शिखाबन्धनम्

प्रणेता –

डॉ० रामाशीष पाण्डेयः

मुमुक्षु भवन वेद वेदांग विद्यालय
वाराणसी
क्रमांक........
दिनांक........

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विद्वद्वरेण्याय गुरवे पं० केदारनाथ ओझा महोदयाय
समर्पयामि नत्वैव शिष्यः.

रामाशीष पाण्डेयः
६।५।७२

आगत क्रमांक..................
दिनांक..................

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिखाबन्धनम्

(संस्कृतनाटकम्, हिन्दी अनुवाद सहितम्)

प्रणेता
डॉ० रामाशीष पाण्डेयः
एम० ए० (संस्कृत-हिन्दी) पी-एच०डी०
साहित्यव्याकरणवेदाचार्यः
(बिहार शासनेन वैदिक सा० पुरस्कारेण सम्मानितः)
संस्कृत विभागाध्यक्षः
मारवाड़ी महाविद्यालयः राँची (बिहारः)

प्रकाशकः
प्रबोध संस्कृत प्रकाशनम्
हरमू, राँची, बिहार।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

संस्करणम —प्रथमम्—१९८२ ई० वर्षम्

सर्वेऽधिकाराः लेखकाधीनाः

प्रकाशकः
प्रबोध संस्कृत प्रकाशनम्
हरमू, रांची।

आवरण चित्रम्
प्रो० रामनारायण पाण्डेयः
प्राध्यापकः, पटना प्रशिक्षण महाविद्यालयस्य।

मूल्यम् : २५ रूप्यकाणि

मुद्रकः
प्रतिमान प्रेस,
हरमू रोड, किशोर गंज,
रांची–८३४००१
फोन : २५३७१

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पुरोवाक्

काव्य नाम सामाजिकदशायां समयवलादागतानां मानवहृदयानां भावानां यथार्थ निरूपण समाजस्य दर्पणभूतञ्च। नाटकं दृश्य काव्यान्तर्भूतं दृश्यकाव्यस्य चाक्षुषप्रधानत्वात् काव्येषु रमणीयं सर्वग्राह्यकञ्च। अवस्थानुकृतिर्नाट्यमिति दशरूपकवचनेन धीरोदात्तादिनायकानां विविधपात्राणाञ्चाङ्गिकवाचिकाहार्यसात्विकाभिनयेनावस्थानुकरणमभेदप्रतिपत्तिश्च नाटकम्। अस्यामभेदप्रतिपत्तौ सामाजिकस्थितेर्यथार्थता दृग्गोचरी भवति। नाट्यस्योपयोगित्वं नाट्यशास्त्रे यथा—

"दुःखार्तानां श्रमार्तानां शोकार्तानां तपस्विनाम्।
विश्रान्तिजननं लोके नाट्यमेतद्भविष्यति॥" १।११४

आनन्दनिष्यन्दिषु रूपकेषु सहृदया अलौकिकरसास्वादं परमानन्दमवाप्नुवन्ति। दुःखार्तानां श्रमार्तानां शोकार्तानां तपस्विनाञ्च विश्रान्ति जननं नाट्यमस्त्येव तदितरेषां सामाजिकानामपि रसाभिव्यञ्जनया अलौकिकानन्देन विश्रान्तिं जनयति।

"जग्राह पाठ्यमृग्वेदात् सामेभ्योगीतमेव च।
यजुर्वेदादभिनयान् रसानाथर्वणादपि॥" ना०शा० इति

सार्ववर्णिकस्य पंचमाख्यस्य नाट्यवेदस्य प्राचीनत्वं सर्वज्ञानमयत्वमानन्दरूपत्वञ्च स्पष्टम्। प्रकृतमिदं शिखाबन्धनं नाम नाटकमैतिहासिकवृत्तमाश्रित्य चाणक्यशिखाया बन्धनमिति प्रतिज्ञा वचनस्यसिद्धौ ग्रथितं विदुषां समक्षे प्रस्तूयते—

ज्ञानलवदुर्विदग्धेन राज्ञानन्देन तिरस्कृतश्चाणक्यः प्रतिज्ञायां स्वकीयां शिखां मोचयन् राज्ये राष्ट्राभिवृद्धये कुशलप्रशासकस्य नियुक्तिं वाञ्छति। राष्ट्राभिवृद्धये समर्पितस्य चन्द्रगुप्तस्य नन्दनाशानन्तर नियुक्ति यावत् चाणक्यस्य मुक्ता शिखा कालसर्पिणीभूता विहरति। अन्ते चन्द्रगुप्तस्य राज्यसिंहासनारोहणानन्तरञ्चाणक्यः स्वकीयां मुक्तां शिखां बध्नाति। राज्ये उपेक्षितो राष्ट्रनायको राज्यमधिरोहतीति राज्यकल्याणाय प्रजाकल्याणाय च। अत्रावश्यकस्थलेषु वैदिकमन्त्राणां प्रयोगः वैदिकपद्धत्यवबोधकः सांस्कृतिक कर्मसु वैदिकविधेः प्राधान्यञ्चाभिव्यनक्ति। वैदिक-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मन्त्राणां पाठे श्रवणे च विविधप्रयोजनमौलिभूतः सर्वग्राहकश्चायं प्रयोगः प्रतिरोधराहित्यं सूचयति। यथार्थचित्रस्योपस्थापयितुं नाट्ये पात्रानुरूपा विविधभाषा प्रयोज्या इति भारतीय नाट्यशास्त्रे विचारः। चाणक्यकाले पात्रानुरूपाणां प्राकृतापभ्रंशादिभाषाणां प्रचलनात् तदार्चितेषु नाटकेषु संस्कृतभाषया सह सर्वजनबोध्याः प्राकृतापभ्रंशादिभाषा अपि प्रयुक्ताः, परं साम्प्रतं सर्वेषांकृते संस्कृतभाषा बोध्या प्रतिरोधराहित्येन व्यवहार्या चेति साम्प्रतिकेषु संस्कृत नाटकेषु व्यवहारशून्यानां सामान्येन दुरधिगम्यानां च प्राकृतादिभाषाणां प्रयोगस्यानौचित्याद्व्यावहारिकत्वाच्चात्र प्राकृतस्य प्रयोगो न विहितः। अत्रवर्णिता आश्रमाः प्राचीनपद्धत्यनुकूलास्तदादर्शभूता वर्तमानकालेऽपि शिक्षा जगति समागतानां दोषाणां प्रतिपादने समर्था, व्यावसायिकशिक्षां प्रति उन्मुखाः छात्राणां भक्त्यामनुशासने चरित्र निर्माणे च सर्वथा अग्रगण्याः। शासनदोषात् जनान्दोलनं सर्वथा आवश्यक मिति न केवलं प्रजातन्त्रे विहितमपि तु राजतन्त्रेऽपि। भ्रष्टशासनेन रोषवर्धनात् तादृशं जनान्दोलन सर्वत्राद्यापि दरीदृश्यते। कस्यापि राष्ट्रस्याभिवृद्धये उत्तमाशिक्षानीतिः आवश्यकी। शिक्षायां विकासे सति राज्ये गुणात्मको विकासः सम्भाव्यते। नन्दराज्ये शिक्षानीतिः दूषिता इति नन्दराज्यस्य पतनं नन्दस्य नाशश्च। यदा ज्ञानस्योपेक्षा भवति तदा अज्ञानान्धो वर्धते। अज्ञाने तमसि निमग्नास्ते जनाः राज्यस्य कल्याणकर्त्तारो न भवन्ति न च भविष्यन्ति। विद्वांसः यत्रोपेक्षिता भवन्ति तत्रान्तः विस्फोटो जायते। अज्ञानात प्रभुत्वमदाच्च शोषणनीतिः प्रादुर्भवति। अतः अज्ञाननाशाय शिक्षाव्यवस्था दृढ़ा भवेत् राज्यकल्याणाय च।

राष्ट्रभावस्योन्नत्यै राज्ये राष्ट्रभावना वर्धनीया। राष्ट्रभावो नहि वर्णे, नहि आश्रमे, नहि धर्मे, नहि सम्प्रदायेषु निवसति अपि तु राष्ट्रं प्रति हार्दिकी भावना सर्वत्र सर्वदा च स्फुरन्ती काचिद्दीपिकेव सर्वस्मिन् विद्यते। सा स्फुरमाणा ज्योतिः स्नेहद्रव्यैः स्निग्धीक्रियते चेत् राष्ट्रभावस्य प्रकाशो भविष्यत्येव। प्रकाशोऽपि स्थिरत्वमेति। अत्र चाणक्यस्तादृशमेव यतते येन तस्य सर्वे सहयोगिनो राष्ट्रं प्रति राज्यं प्रति च दत्तावधाना आसन्। पुनश्च राज्यमदमत्तः प्रभुत्वान्धो नन्दः अज्ञाने निवसन् स्वार्थे च तिष्ठन् राष्ट्रं प्रति नहि जागरूकः। तस्य पदाधिकारिणः सेवकाश्च राष्ट्र प्रति च दत्तावधाना न आसन

भारतीय नाट्यपरम्परायां नवीनविचाराणां ... नं युगानुरूप-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मावश्यकतानुरूपञ्च परिवर्तनमत्र विहितम् । नाटकस्यास्य हिन्दीभाषायामनुवादस्तु मया हिन्दीज्ञानां मित्राणामनुरोधादत्र विहितः । यद्यपि संस्कृत भाषाऽपि अत्र तादृशी सरला विद्यते या हिन्दीज्ञैरपि बोध्या भविष्यतीति मे विश्वासः ।

अत्रस्थाः कतिपये विद्वांसः अस्य प्रणयनं श्रुत्वा प्रसन्नाः सञ्जाता इति तान् प्रति कृतज्ञोऽस्मि । राँचीः विश्वविद्यालयस्य भूतपूर्वाः संस्कृतविभागाध्यक्षाः प्रो० दिनेश प्रसाद पाण्डेय महोदयाः मां भृशमुत्साहितवन्तः स्वीयांशुभाशंसाञ्च दत्तवन्तः अतोऽहं तान् प्रति आभारी अस्मि । राँचीविश्वविद्यालयस्यैव स्नातकोत्तर संस्कृतविभागाध्यक्षाः प्रोफेसर पदमलङ्वर्णाः मद्गुरुवर्य्याः डॉ० अयोध्या प्रसाद सिंहमहोदयाः नाटकस्यास्य प्रणयनं श्रुत्वा प्रसन्नतां गताः स्वकीयां शुभाशंसां दत्तवन्तः । अतः तान् प्रत्यहं प्रणतोऽस्मि । राँचीस्य राजकीय संस्कृतोच्च विद्यालयस्य भूतपूर्वाः प्रधानाचार्याः पं० लम्बोदर झा महोदयाः नाटकमिदं धैर्येणश्रुत्वा स्वकीयां हार्दिकीं प्रसन्नतां प्रकटितवन्तस्तथा स्वीयां शुभकामनां प्रेषितवन्तः । अतः तान् प्रति कृतज्ञोऽस्मि । राँचीस्थ सन्त जेवियर महाविद्यालयस्य भूतपूर्वाः प्राध्यापकाः प्रो० हरिशङ्कर त्रिपाठमहोदयाः नाटकस्यास्य निर्मितिं श्रुत्वा प्रसन्नमनाः आशिषं दत्तवन्तः अतः तान् प्रत्याभारं प्रकटयामि । येषां शुभाशंसाऽत्र विद्यते तान् प्रति नतमस्तकोऽस्मि । पटनास्थ शिक्षण महाविद्यालयस्य प्राध्यापकाः प्रो० रामनारायण पाण्डेयमहोदयाः नाटकस्यास्य कृते आवरणचित्र दत्वा मां भृशमुपकृतवन्तः अतोऽहं साभारं नतेन मूर्ध्ना तान् नमामि । अन्ये मित्रवर्य्याअपि धन्यवादार्हा ये मित्रत्वामित्रत्वभावदर्शका विद्यन्ते । मुद्रण कार्ये साफल्याय राँची प्रतिमान मुद्रणालयस्य व्यवस्थापको धन्यवादार्हः । काश्चित् मुद्रणदोषाः शुद्धि पत्ररूपेण पुस्तकस्यान्ते प्रदत्ता विद्वद्भिः परिमार्जनीयाः ।

सागरं तत्तुकामोऽहं कामये तृणसम्बलम् ।
सागरस्य रहस्यज्ञैस्तटस्थैर्नहि दुर्जनैः ॥

विदुषां वशंवदः
रामाशीष पाण्डेयः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पूज्य पितृदेवस्य पं० सिद्धेश्वर पाण्डेयस्य-
चरणारविन्दयोः

यस्यात्मजोऽहं समयेन येन,
संलालितो ज्ञानदिशासु नीतः
स्वीयां कृतिं तस्य करे मनोज्ञे
नतेन मूर्ध्नाऽद्य समर्पयामि ॥

प्रणतो रामाशीषः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

A. P. SINGH
D. Litt. (Pat)
University Professor & Head
Ranchi University
RANCHI-834001

19/3 University colony
Bariatu, RANCHI-
834009

अस्माकमन्तेवासिना डॉ० रामाशीष पाण्डेयेन विरचितं शिखाबन्धनं नाम नाटकं मयावलोकितम्। संस्कृत काव्य-परम्परायां दृश्यकाव्यस्य तत्रापि नाटकनामकस्य रूपकभेदस्य चारुता अन्यत् सर्वं काव्यचारुत्वं तद्वैशिष्ट्यं चाधिरोहतीति तथ्यमिदं विद्वत्सम्मतम्। डॉ० पाण्डेयेन प्रस्तुत नाट्यरचनायां महाकविविशाखदत्तप्रणीत मुद्राराक्षसस्यैव प्रख्यातवस्तु नवीन परिवेशेषु स्थापयित्वा परिणतसिसृक्षायाः प्रचुरं रूपं समुद्घाटितम्। अधुनातने युगेऽपि एतादृशी गुणमयी काव्यसृष्टिः प्रस्तूयत इत्यस्ति प्रमोदावहम्। नाटकमिदं विदुषां सहृदयानाञ्च मनांसि समावर्जयत्विति नः कामना।

ह० अयोध्या प्रसाद सिंहः

"मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे।
मित्रस्य च चक्षुषा मां सर्वाणि भूतानि समीक्षन्ताम्"

प्रो० दिनेश प्रसाद पाण्डेयः
एम० ए० (द्वय) विद्यालंकारः
व्याकरणशास्त्राचार्यः, संस्कृतरत्नम्
अध्यक्षः (अवकाश प्राप्तः)
संस्कृत विभागः रा० वि० वि०

"सूर्य मुख्यालयः"
कडरम टोली; रांची
फोन २२६६८९

डॉ० रामाशीष पाण्डेयकृत सरसनिबन्धनं शिखाबन्धनं नाम नाटकमवलोक्य परमं प्रमोदमनुभवामि। नाटकेऽस्मिन् सुप्रसिद्धमैतिहासिकवृत्तमपि एतावत्सुरुचिपूर्णशैल्यां गुम्फितं यद् हठादावर्जयति हृदयं सहृदयानां विदुषाम्। अतिप्राचीनस्यापि इतिवृत्तस्य घटनात्र नाटके प्रत्यक्षतः अक्षिसमक्षं भूयमानावलोक्यते। एषैव नाट्यशैली मनोमोहयति दर्शकानाम्। मन्ये नाटकमिदं हृदयहारिभावेन मधुरयाभाषयाऽवसरोचित शब्दयोजनया च परमां प्रीतिमुत्पादयेद् विदुषां हृदि।

ह० दिनेश प्रसाद पाण्डेयः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रीः

रांचीस्थराजकीयसंस्कृतोच्च विद्यालयतो—
निवृत्तसेवस्य प्राचार्य श्री लम्बोदर शर्मणः— शुभाशंसनम् ।।

रम्यं नाट्यनिबन्धं चन्द्रप्रतिभा प्रसूनमधुगन्धम् ।।
चाणक्याञ्चितबुद्धेरुद्गतनीतेरुदात्ततरबन्धम् ।।१।।
बीजाद्यर्थप्रकृतिन्यासौचित्यानुसन्धानम् ।।
प्रतिपदमनुपमसुषमाशोभिविधान समाधानम् ।।२।।
प्रत्यङ्कं कलिताङ्गैरभिमतभावैर्लसत् पद्यम् ।।
सद्यः सहृदयहृदयाह्लाद्यनवद्यं च सद्गद्यम ।।३
पाण्डेयश्रीरामाशीषविरचित विलोक्य पूर्णाङ्कम् ।।
हृष्यति ममान्तरङ्गं रङ्गं नट नायकस्येव ।।४
इतिहासस्य वलक्षं पक्षमुपाश्रित्य यद्गत रुचिरम् ।
तदिद जयतु स्वगुणैरधि विश्व नाटकं सुचिरम् ।।५।।

पात्राणि

पुरुषाः स्त्रियः

चाणक्यः	नायकः	नटी
चन्द्रगुप्तः	सहनायकः	आश्रममाता
नन्दः	राजा	विजया, जया, रमा राजसेविकाः
सूत्रधारः	नाटक प्रबन्धकः	नृत्यांगना

कुलपतिः

धनरुचिः, वररुचिः, वसुरुचिः, धर्मेन्द्रः, ज्ञानेन्द्रः, सत्येन्द्रः
सत्यवसु, विश्वावसु, चित्रवसु, वसुमित्रः, धनमित्रः,
बुद्धिमित्रः, धर्ममित्रः, माणिक्यः, श्रुतिधरः, धर्मधरः ब्रह्मचारिणः
सूर्यायनः, पृथ्वीदत्तश्च ।

सुमुखभद्रमुखौ, धर्मदासकर्मदासौ, रुद्रकभद्रकौ, सुकर दुष्करौ नन्दस्य भृत्याः

पण्डितः	राज्ञः नन्दस्य
प्रधान पण्डितः	नन्द सभायाः
भृत्यः	शत्रुदमनस्य
मन्त्रिणः	नन्दस्य
हारकः	वैद्यराजः
सेनापतयः,	बालकाः

उद्घोषकः, नृत्यरसिकाः, वादकाः, द्वारपालाः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रीः

शिखाबन्धनम्

प्रथमोऽङ्कः

यो मञ्चे भुवि ताण्डवञ्च कृतवान् यं स्तौति योगीश्वरः
पीतं येन हलाहलं स्वमनसा यस्मै नमः सर्वदा ।
यस्माद्बिभ्यति दुष्टभाववलिता यस्याज्ञया भूतलं
यस्मिन् विश्वमिदं प्रयाति सततं सः शङ्करः पातु वः ।। (क)

यया विश्वमिदं सर्वं सूक्ष्म विस्तार रूपकम्
दृश्यते परमं रम्यं, सा बुद्धिः राजतां सदा ।।२।।

(नान्द्यन्ते[1] ततः प्रविशति सूत्रधारः[2])

(क) अस्मिन् श्लोके सप्तविभक्तयः प्रयुक्ताः, शार्दूलविक्रीडितवृत्तम्

प्रभा—१ नान्दी : आशीर्वचन संयुक्ता स्तुतिर्यस्मात् प्रयुज्यते ।
देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता ।।ना०शा०।।१
नन्दयतीतिनन्दः, नन्द एव नान्दः, नन्द् + अच् + अण्
+ ङीप् = नान्दी ।

२ सूत्रधारः : नाट्योपकरणादीनि सूत्रमित्यभिधीयते
सूत्रं धारयतीत्यर्थे सूत्रधारो निगद्यते ।।

हिन्दी : जिसने संसार रूपी मञ्च पर ताण्डव नृत्य किया, योगी लोग जिसकी उपासना करते हैं, जिसने स्वेच्छा से हलाहल विष का पान किया, जिसके लिए सदा नमस्कार है । दुष्टभाव से युक्त प्राणी जिससे डरते हैं, जिसकी आज्ञा से यह सम्पूर्ण भूतल है तथा जिसमें यह सम्पूर्ण संसार सततं विलीन होता है वे शंकर आप लोगों की रक्षा करें ।।१।।

जिससे सूक्ष्म एवं विस्तार यह सम्पूर्ण संसार परम रम्य दीखता है, वह बुद्धि सदा सुशोभित हो ।।२।।

(नान्दी पाठ के अन्त में सूत्रधार का प्रवेश)

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सूत्र० : (परिभ्रमन् आकाशमवलोक्य स्वगतम्[1]) एते शिखिनो मुक्त शिखा मग्नाः सन्ति। (किञ्चिद्विचार्य) ज्ञातम्। मेघाच्छन्ने आकाशे शिखिनो मुक्तशिखा जायन्ते। (प्रेक्षकान् दृष्ट्वा) अये! समुपागताः पारिषद्याः अभिरूपभूयिष्ठाः। एतेषां मनोरञ्जनार्थं किमद्यकरणीयमिति शीघ्रमेव नटीं शब्दापयामि। (नेपथ्याभिमुखमवलोक्य प्रकाशम्[2]। (आर्ये! इतस्तावदागम्यताम्।

नटी : (प्रविश्य) आर्य! इयमस्मि।

सूत्र० : (हस्तेन प्रेक्षकान् निर्दिश्य) पश्यतु, भूयिष्ठाः पारिषद्याः समुपस्थिताः। किमद्यप्रस्तोतव्यमस्माभिः ?

नटी : आर्य! भवता पूर्वमेव प्रकाशितं यदद्य डॉ० रामाशीष पाण्डेयेन ऐतिहासिक वृत्तमाधारीकृत्यग्रथितवस्तुना नवनिर्मितेन शिखाबन्धन[3] नाटकेनोपस्थातव्यमस्माभिः।

---

१ स्वगतम् : अश्राव्यं स्वगतं मतम्—द० रू०

२ प्रकाशम् : सर्वश्राव्यं प्रकाशं स्यात्—द० रू०

३-नन्दतिरस्कारेणोन्मुक्तायाः चाणक्यशिखायाः बन्धनं नन्दनाशानन्तरं चन्द्रगुप्तराज्यारोहणे ग्रन्थिदानंयस्मिन् तत शिखाबन्धनं नाम नाटकम्।

सूत्र० : (घूमता हुआ आकाश की ओर देखकर (स्वगत) ये सभी मयूरगण अपने पंखों को फहराये मग्न हैं (कुछ सोचकर) समझा, मेघाच्छन्न आकाश रहने पर मयूर अपने पंखों को फहरा देते हैं। (प्रेक्षकों को देखकर) अये प्रायः विद्वान् प्रेक्षकगण यहाँ उपस्थित हैं। इन लोगों के मनोरञ्जन के लिए आज क्या करना चाहिए, एतदर्थ शीघ्र ही नटी को बुलाता हूँ। (नेपथ्य की ओर देखकर प्रकाश) आर्ये! इधर तो आओ।

नटी : (प्रवेश करके) आर्य! मैं यह आ गयी।

सूत्र० : (हाथ से प्रेक्षकों को निर्देश करके) देखो, काफी संख्या में विद्वान् प्रेक्षकगण उपस्थित हैं। आज हम लोगों को क्या प्रस्तुत करना चाहिए ?

नटी : आर्य! आपने पहले ही कहा था कि आज डॉ० रामाशीष पाण्डेय द्वारा नवनिर्मित ऐतिहासिक वृत्त पर आधारित शिखाबन्धन नामक नाटक प्रदर्शित करना है।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सूत्र ०: अहो ! ज्ञातम् । (स्वगतम्) चैतन्यमधिगन्तु पुरुषस्य कृते प्रकृतेर्योगदानमपेक्ष्यते । प्रकृति रूपा बुद्धिः सर्वं सम्पादयति । ततस्तु आनन्दमयं जगत् दरीदृश्यते (प्रकाशम) आर्ये ! तर्हि प्रतिपात्रमाधीयतां यत्नः साधुप्रयोगाय ।

नटो : यदार्य आज्ञापयति । (इति निष्क्रान्ता)

सूत्र० : (नेपथ्ये कर्णं दत्वा, गणानान्त्वा गणपतिं हवामहे इति वैदिक मन्त्रोच्चारणं श्रुत्वा, स्वगतम्) अये ! आश्रमे वेदध्वनिः श्रूयते । प्रतीयते ब्रह्मचारीणां वेदपाठस्याभ्यासो चलति । मन्त्रे काचिदपूर्वाशक्तिः । पश्यामि तावत् । (इति निष्क्रान्तः)

(प्रस्तावना[1])

(ततः प्रविशति ब्रह्मचारिभिः सह कुलपतिः । सर्वे यथासनं तिष्टन्ति)

---

[1]–प्रस्तावना : नटी विदूषकोवापि पारिपार्श्विक एव वा
सूत्रधारेण सहिताः संलापं यत्र कुर्वते ।
चित्रैर्वाक्यैः स्वकार्योत्थैः प्रस्तुताक्षेपिभिर्मिथः
आमुखं तत्तु विज्ञेयं नाम्ना प्रस्ताविनाप सा ।।

सा० द० ६।३१–३२

सूत्र० : अहो ! जान गया (स्वगत) चैतन्य की प्राप्ति हेतु पुरुष के लिए प्रकृति का योगदान अपेक्षित है । प्रकृति रूपा बुद्धि सब कुछ सम्पादित करदेती है । तदनन्तर आनन्दमय जगत् पुनः पुनः दृश्यमान होता है । (प्रकाश) आर्ये ! तब तो सुन्दर नाट्याभिनय के लिए प्रत्येक पात्रों को यत्नपूर्वक तैयार करो ।

नटी : आर्य की जो आज्ञा (ऐसा कहकर निकल जाती है ।)

सूत्र० : (नेपथ्य की ओर कान लगाकर, गणानान्त्वा इस वैदिक मन्त्रोच्चारण को सुनकर, स्वगत) अये ! आश्रम में वेदध्वनि सुनाई पड़ती है । लगता है ब्रह्मचारियों का वेदपाठ चल रहा है । मन्त्र में कोई अपूर्व शक्ति है । तबतक देखता हूँ । निकल जाता है ।)

(प्रस्तावना)

(इसके बाद ब्रह्मचारियों के साथ कुलपति का प्रवेश । सभी अपने-अपने आसन पर बैठे हैं ।)

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कुलपतिः : (शान्ति पाठं करोति) ॐ द्यौ शान्तिरन्तरिक्षं शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः वनस्पतयः शान्तिर्विश्वेदेवाः शान्ति ब्रह्म शान्तिः सर्वं शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि[1] ।।३।।

ब्रह्म० : (सर्वे स्वस्तिवाचनं कुर्वन्ति)

ॐ स्वस्तिन इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नोबृहस्पतिर्दधातु ।।४।।

(इति सर्वे ब्रह्मचारिणो यज्ञकुण्डे हविर्ददति। प्रथमं कुलपतिः स्वाहेति शब्दं करोति ततो ब्रह्मचारिणस्तमनुवर्तन्ते)

ॐ प्राणाय स्वाहा, ॐ व्यानाय स्वाहा, ॐ अपानाय स्वाहा, ॐ समानाय स्वाहा, ॐ उदानाय स्वाहा ।

२–शु० य० वे० ३६।१७
३- शु० य० वे० २५।२१

कुल० : (शान्ति पाठ करते हैं) द्यु लोक में, अन्तरिक्ष में, पृथिवी में, जल में, औषधियों में, वनस्पतियों में, सम्पूर्ण देवों में, ब्रह्म में या वेद में तथा सम्पूर्ण जगत् में जो सम्पूर्ण शान्ति है, उस सम्पूर्ण शान्ति से मुझे युक्त बनाओ ।।३।।

ब्रह्म० : (सभी स्वस्तिवाचन करते हैं) यशस्वी इन्द्र हमलोगों को कल्याण करें। सर्वधन सम्पन्न एवं सर्वज्ञ पूषा हम लोगों को कल्याण करें। विनाश रहित रथ चक्रवाले या पंख वाले गरुड़ हम लोगों का कल्याण करें और बृहस्पति हमलोगों का कल्याण करें ।।४।।

(सभी ब्रह्मचारी यज्ञकुण्ड में हवन डालते हैं। प्रथम कुलपति स्वाहा शब्द का उच्चारण करते हैं तदनन्तर ब्रह्मचारीगण उनका अनुकरण करते हैं ।)

प्राण वायु के लिए स्वाहा, व्यानवायु के लिए स्वाहा, अपान वायु के लिए स्वाहा, समान वायु के लिए स्वाहा, उदान वायु के लिए स्वाहा ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ब्रह्मचारिणः आहुतिं दत्वा समवेतस्वरेण मन्त्रपाठं कुर्वन्ति)

सर्वे---मेधां मे वरुणो ददातु मेधामग्निः प्रजापतिः
मेधामिन्द्रश्च वायुश्च मेधां धाता ददातु मे ॥५॥[1]
यां मेधां देवगणाः पितरश्चोपासते
तया मामद्य मेधयाऽग्ने मेधाविनं कुरु ॥६॥[2]

(सर्वे ब्रह्मचारिणो यथासने सावधानास्तिष्ठन्ति)

कुलपति : मम हृदयस्यैकदेशाः ब्रह्मचारिणः ! अद्य दीक्षान्त दिवसः । द्वादश वर्षं यावत् मया सर्वा विद्या[3] पाठिताः । चत्वारो वेदाः षडंगानि धर्मशास्त्रन्याय मीमांसापुराणादिविद्यासु भवन्तः सर्वे दक्षाः अभूवन् । शिक्षाग्रहणमन्यत्, तस्याचरणप्रचारणमन्यत् । आश्रमे सैद्धान्तिकी शिक्षा वाहुल्येन दत्ता व्यावसायिकी व्यावहारिकी चाल्पेन । यतो हि आश्रमो न तादृशी प्रयोगभूमिः ।

१-शु० य० वे० ३२/१५
२-शु० य० वे० ३२/१४
३-अंगानि वेदाश्चत्वारो मीमांसान्यायविस्तरः
धर्मशास्त्रं पुराणञ्च विद्याह्येता चतुर्दश ॥

(ब्रह्मचारीगण आहुति देकर समवेत स्वर में मन्त्रपाठ करते हैं)

सभी—वरुण मुझे मेधा दें, अग्नि एवं प्रजापति मुझे मेधा दें, इन्द्र और वायु मुझे मेधा दें, धाता हमें मेधा से युक्त बनावें ॥५।

जिस मेधा की उपासना देवतागण तथा पितृगण किया करते थे, उस मेधा से हे अग्निदेव ! मुझे मेधासम्पन्न बनाओ ॥६॥

(इसके बाद सभी ब्रह्मचारी सावधान होकर अपने-अपने आसन पर बैठ जाते हैं) ।

कुलपति : मेरे हृदय के अंश (प्रिय) ब्रह्मचारीगण ! आज दीक्षान्त दिवस है। बारह वर्षों तक मैंने आप लोगों को सारी विद्याएँ पढ़ायी। चारो वेद, छह वेदांग, धर्मशास्त्र, न्यायशास्त्र, मीमांसा, पुराण आदि विद्याओं में आप लोग प्रवीण हो गये। शिक्षा ग्रहण करना अलग बात है, तदनुसार आचरण एवं प्रचारण अलग। आश्रम में सैद्धान्तिकी शिक्षा वाहुल्येन दी गयी, व्यावसायिकी तथा व्यावहारिकी अल्प रूप में क्योंकि आश्रम उस प्रकार का प्रयोग स्थल नहीं है। विद्या चार प्रकार से पूर्ण

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चातुर्विध्येन हि विद्या पूर्णाभवति तेषु द्वैविध्यं तु अधीतिबोधात्मकंसम्यक् तया भवद्भिः गृहीतम् । परमाचरणप्रचारणमिति द्वैविध्यमधुनापि अवशिष्टं वर्त्तते । व्यावहारिके जीवने गार्हस्थ्ये च अधिगताया विद्यायाः आचरणप्रचारणं कार्येण भाव्यमतो हि सा पूर्णतां यास्यति भवतां जीवने साफल्यञ्चागमिष्यति । व्यावहारिके जीवने किं करणीयमकरणीयमिति भवद्भिः आश्रमजीवने ज्ञातम् । विद्या विनयं ददाति इति तु भवतां व्यवहारे आश्रमे दृष्टम् । परं वाह्यजीवनेऽपि विनयस्याचरणमेव विद्यायाः साफल्यम् ! यद्यपि सर्वे छात्राः विद्याविनयसम्पन्नाः सन्ति परं गार्हस्थ्य जीवने यौवनदशायाञ्च प्रभुत्वमधिगम्य भौतिकसुखमनुभूय तत्तद मदविकारेण भवतां मनांसि विकृतानि न भवेयुरिति कामये । यतो हि शास्त्रजलप्रक्षालितनिर्मलाऽपि बुद्धिः यौवनदशायां कालुष्यमुपयाति । मायावृत्तेन वित्तेन भौतिक चाकचिक्येन प्रेयसि समासक्तचित्ता हि भवन्ति लोकाः । प्रभुत्वं तु अनर्थकरं विकारं जनयति जनेषु । एतेषां विकाराणां

होती है। उनमें आपलोगों ने अध्ययन एवं बोधरूपी दो प्रकार की विद्याएँ सम्यक् रूप में ग्रहण की। लेकिन आचरण एवं प्रचारण दो प्रकार अभी भी अवशिष्ट हैं। व्यवाहारिक जीवन में और गार्हस्थ्य जीवन में प्राप्त विद्या का आचरण एवं प्रचारण कार्य सम्पन्न करना चाहिए, इससे विद्या पूर्ण होगी तथा जीवन में सफलता आयेगी। व्यावहारिक जीवन में क्या करना चाहिए क्या नहीं करना चाहिए इसे आप लोगों ने आश्रम काल में जाना। विद्या विनय देती है यह आश्रम में आप लोगों के व्यवहार से देखा, लेकिन समाज में, वाह्य जीवन में विनय का आचरण करना ही विद्या की सफलता है। यद्यपि सभी छात्र विद्या विनय से सम्पन्न हैं लेकिन गार्हस्थ्य जीवन में जवानी की अवस्था में प्रभुत्व प्राप्त कर भौतिक सुख का अनुभव कर उन सबों के मदविकार से आप लोगों का मन विकृत नहीं हो ऐसी मेरी कामना है। क्योंकि शास्त्र जल से प्रक्षालित निर्मल भी बुद्धि जवानी की अवस्था में कालुष्य प्राप्त करती है। माया से आवृत धन के द्वारा भौतिक सुख के चमत्कार से लोग प्रिया में समासक्त चित्त वाले हो जाया करते हैं। प्रभुत्व तो लोगों में अनर्थ कर विकार उत्पन्न कर देता है। इन विकारों

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सद्भावे अधीताऽपि विद्या निष्फला भवति। तेषां प्राधान्याद-विवेको जायते। अतः आश्रमे गृहीतं निग्रहादिकार्यमाश्रयणीयम्। प्रेयस् प्रियकरं भवति परं मानव जीवनं श्रेयसि एव तृप्यते सार्थकतामेतिच।

स्मरन्तु कठोपनिषदः वाक्यम्—

'श्रेयश्च प्रेयश्च मनुष्यमेतस्तौ सम्परीत्य विविनक्ति धीरः
श्रेयो हि धीरोऽभिप्रेयसोवृणीते प्रयो मन्दोयोगक्षेमाद् वृणीते ।।६।।'[1]

सम्प्रति दीक्षान्त समारोहस्य समापनं भवति। अद्य भवद्भिः आश्रमे स्थातव्यमपरेद्युः पुण्यकाले स्वं स्वं स्थानं गन्तव्यं यथाचारमाचरणीयमिति। जयतु भारती।

सर्वे : (समवेत स्वरेण) जयतु भारती।

कुल० : (किञ्चिद्विचार्य शीघ्रमेव) अन्ते एका बुद्धिपरीक्षा। कः कथयिष्यति यत् कयोर्वृद्धिः रुचिकरी न भवति ?

१—कठो० : १।२।३

के रहने पर सारी पढ़ी गयी विद्यायें निष्फल हो जाती हैं। इनकी प्रधानता के चलते अविवेक उत्पन्न हो जाता है। अतः आश्रम में ग्रहण किए निग्रहादि कार्य का आश्रयण करना चाहिए। प्रेयस् प्रियकर होता है, लेकिन मानव जीवन श्रेयस् से ही तृप्त होता है तथा सार्थक होता है।

कठोपनिषद् के वाक्य का स्मरण करें—

श्रेय तथा प्रेय दोनों ही मनुष्य के समक्ष आते हैं। विचारवान मनुष्य उन दोनों के स्वरूप पर भलीभाँति विचार करके उनको अलग-अलग समझ लेता है। धीर व्यक्ति परम कल्याण के साधन श्रेयस् को ही प्रेयस् की अपेक्षा श्रेष्ठ समझ कर ग्रहण करता है तथा मन्दबुद्धिवाले लौकिक योगक्षेम की अभिलाषा से प्रेयस् (भौतिक साधनों) को ही अपनाता है।।७।।

इस समय दीक्षान्त समारोह का समापन होता है। आज आप लोग आश्रम में ठहरेंगे। दूसरे दिन पुण्यकाल में अपने-अपने स्थान जायेंगे तथा यथाचार पालन करेंगे। भारती की जय।

सभी : (समवेत स्वर में) भारती की जय।

कुल० : (कुछ विचार कर शीघ्र ही) अन्त में एक बुद्धि परीक्षा। कौन बतायेगा कि किन दो की वृद्धि रुचिकर नहीं होती ?

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चाणक्यः : (उत्थाय) श्रीमन् रोगस्य शत्रोश्चाभिवृद्धिर्न रुचिकरी भवति ।

कुल० : कथम् ?

चाण० : रोगः शरीरस्य लघुगुरुर्वा नोपेक्षणीय सुधिया कदापि
लघुर्गुरुत्वं किल शत्रुसन्निभः प्राप्नोति हन्तोति
चस्वाश्रितं सः॥८॥

कुल० : वाढम् वाढम् । शत्रुतो रोगाच्च रक्षा कथं विधेया ?

चाण० : गुरुवर !

"समूलमुन्मूलनमेव केवलं रोगस्य शत्रोश्च समाश्रितस्य ।
कल्याणहेतोः किलमानवानां कर्त्तव्यमेवं सुधिया सदैव ॥९॥

कुल० : वाढम्, वाढम्, गच्छन्तु सर्वे आवास भवनम् । अहमद्य नितरां
प्रसन्नो अस्मि ।

ब्रह्म० : यथादिशन्ति श्रीमन्तः (इति यथाक्रमं उत्थाय चरणस्पर्शैर-
भिवादनं कुर्वन्ति ।)

धनरुचिः : भो ! धनरुचिरहमभिवादये ! इति सव्येन सव्यं दक्षिणेन
दक्षिणञ्च चरणौ स्पृशति ।)

चाणक्य : (उठकर) श्रीमन् रोग तथा शत्रु की वृद्धि रुचिकर नहीं होती ।

कुल० : कैसे ?

चाण० : शरीर का रोग, छोटा हो या बड़ा, की उपेक्षा नहीं करनी
चाहिए । छोटा ही रोग शत्रु के समान बढ़कर बड़ा हो जाता
है तथा स्वाश्रित को समाप्त कर देता है ॥८॥

कुल० : बहुत सुन्दर, बहुत सुन्दर ! शत्रु से तथा रोग से कैसे रक्षा
करनी चाहिए ?

चाण० : गुरुवर ! शत्रु को तथा समाश्रित रोग को मानवों के कल्याण
के लिए विद्वानों के द्वारा समूल नष्ट कर देना चाहिए ॥९॥

कुल० : बहुत अच्छा, बहुत अच्छा । आप सभी आवासभवन जाएँ ।
आज मैं अत्यन्त प्रसन्न हूँ ।

ब्रह्म० : श्रीमान् का जो आदेश (इस प्रकार यथाक्रम उठकर चरणस्पर्श
के साथ अभिवादन करते हैं ।

धनरुचि : भो ! मैं धनरुचि आपका अभिवादन करता हूँ । इस प्रकार
बायें हाथ से बायाँ एवं दाहिने हाथ से दाहिना चरण स्पर्श
करते हैं ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कुल० : स्वस्त्यस्तु (इति दक्षिणहस्तमुत्थाय आशीर्वादं प्रयच्छति।)
(अनेन क्रमेण वररुचिः वसुरुचिः धर्मेन्द्रः, ज्ञानेन्द्रः, सत्येन्द्रः, सत्यवसुः, विश्वावसुः, चित्रवसुः, वसुमित्रः धनमित्रः, बुद्धिमित्रः, माणिक्यः चाणक्यादयो प्रणमन्ति)।
सर्वे गुरुणा आशीर्वादं लब्ध्वा स्वं स्वं कुशास्तरणं गृहीत्वा आश्रमं प्रति गच्छन्ति। चान्तेचाणक्यः व्रजति।)

कुल० : (सर्वेषु प्रस्थितेषु आत्मगतम्) नूनमेतेषां ब्रह्मचारिणां मध्ये कुशाग्रबुद्धिश्चाणक्यः। राष्ट्रकल्याणमेतादृशेनैव संभाव्यते। चिरंजीवतु। अहमपि विश्रामहेतोः सम्प्रति आश्रमभवनं व्रजामि। (निष्क्रान्तः)
(स्थानम्—कुलपतिभवनम्। कुशास्तरणे कुलपतिः विराजते। समीपे एव पुस्तकानि व्यवस्थापयन्ती आश्रममाता तिष्ठति।)

कुल० : आर्ये! अद्यैव ब्राह्मवेलायां सर्वे दीक्षिता अन्तेवासिनः स्वं स्वं स्थानं गमिष्यन्ति। सर्वे छात्राः कुशाग्रबुद्धयः सन्ति। सत्पात्रेषु विद्यां निधाय मे मनः परमामोद सम्पन्नं विद्यते। कुतः—

कुल० : कल्याण हो, (दाहिना हाथ उठाकर आशीर्वाद देते हैं।)
(इसी क्रम से वररुचि, वसुरुचि, धर्मेन्द्र, ज्ञानेन्द्र, सत्येन्द्र, सत्यवसु, विश्वावसु, चित्रवसु, वसुमित्र, धनमित्र, बुद्धिमित्र, माणिक्य, चाणक्य आदि प्रणाम करते हैं। सभी गुरु से आशीर्वाद प्राप्त कर अपना अपना कुशास्तरण लेकर आश्रम की ओर जाते हैं। अन्त में चाणक्य जाता है।)

कुल० : (सबों के चले जाने पर आत्मगत) निश्चय ही इन ब्रह्मचारियों के बीच चाणक्य अधिक कुशाग्र बुद्धि है। राष्ट्रकल्याण ऐसे लोगों से ही संभव है। यह दीर्घायु हो। मैं भी अब विश्राम के लिए आश्रम भवन चलता हूँ। (निकल जाते हैं)
(स्थान कुलपति भवन। कुश की चटाई पर कुलपति बैठे हैं। समीप में ही पुस्तकों को व्यवस्थित करती हुई आश्रममाता स्थित हैं।)

कुल० : आर्ये! आज ही ब्राह्मवेला में सभी दीक्षित छात्र अपने-अपने स्थान जायेंगे। सभी छात्र कुशाग्र बुद्धिवाले हैं। सत्पात्रों में विद्या प्रदान कर आज मेरा मन काफी प्रसन्न है। क्योंकि—

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पुत्रस्याभ्युदयं दृष्ट्वा पितरौ तुष्यतः यथा
तथा ज्ञानान्वितानेतान् छात्रान् तुष्यामि साम्प्रतम् ॥१०

आश्रममाता : देव ! एते सदाचाररता आश्रमस्य शोभाधायका अन्तेवासिनः सत्यमेव परिनिष्ठितधियो दीप्तिमन्तश्च विद्यन्ते । परमेतेषु सर्वातिशायी कोऽस्ति इति ज्ञातुमिच्छामि ।

कुल० : आर्ये ! अस्य समूहस्य सर्वे छात्राः मेधाविनो विद्यन्ते । परं द्वित्रा विशिष्टाः सन्ति । तेष्वपि चाणक्यः सर्वातिशायी प्रत्युत्पन्नमतिः इति तर्कयामि ।

आ० मा० : (किञ्चिद्विचार्य स्वगतम्) चाणक्यस्य बुद्धेः प्रशंसा तु पूर्वमेवार्येण कृता (प्रकाशम्) आर्य ! ममनसि जिज्ञासा वर्तते यत् एकधा दत्ता विद्या कथं वैविध्यं धार्य्यते ?

कुल० : आर्ये ! शृणु । मेधाशक्तिस्तु क्षेत्रभूता न्यूनाधिक्यं सर्वस्मिन् विद्यते । परं तस्या विकासःकारणान्याश्रयति । यथा—

पुत्र के अभ्युदय को देखकर जिस प्रकार माता पिता सन्तुष्ट होते हैं उसी प्रकार ज्ञान सम्पन्न इन छात्रों को देखकर मैं इस समय अत्यन्त प्रसन्न हूँ ॥१०

आ० मा० : देव ! ये सभी छात्र सदाचारी, आश्रम को विभूषित करने वाले, परिनिष्ठित बुद्धिवाले तथा प्रभापूर्ण हैं, लेकिन इन छात्रों में सबसे अधिक तेजस्वी कौन है ? यह मैं जानना चाहती हूँ ।

कुल० : आर्ये ! इस समूह के सभी छात्र मेधावी हैं लेकिन इनमें दो तीन छात्र अतिशय मेधा सम्पन्न, विशिष्ट हैं । उनमें भी चाणक्य सबों में अधिक तेजस्वी तथा प्रत्युत्पन्नमति वाला है, ऐसा मैं अनुभव करता हूँ ।

आ० मा० : (कुछ विचार कर स्वगत) चाणक्य की बुद्धि की प्रशंसा तो पहले ही आर्य ने की है (प्रकाश) आर्य ! मेरे मन में जिज्ञासा है कि एक प्रकार से दी गयी विद्या कैसे विविधता धारण करती है ?

कुल० ! आर्ये ! सुनो । क्षेत्रभूत मेधाशक्ति तो अधिक या कम सबों में रहती ही है । लेकिन उसका विकास विभिन्न कारणों पर आश्रित है । यथा—

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वीजानां पतनं क्षेत्रे समत्वं किल धार्यते
तस्योर्वरक वैभिन्न्यादङ्कुराणां विभिन्नता ।।११

पुनश्च मेधाक्षेत्रं पूर्वजन्मार्जितया शक्त्या विशिष्यते । तस्या विकासाय अन्यान्यपि कारणानि विद्यन्ते ।

आ० मा० : आर्य ! अहं तु मन्ये अभ्यसने न्यूनाधिक्यमपि कारणम् ।

कुल० : तस्यापि तत्र योगो विद्यते ।

आ० मा० : (किञ्चिद्विचार्य स्वगतम्) परमोदारतया स्वात्मयोगं न प्रकाशयति आर्यः इतिमन्ये । (प्रकाशम्) आर्य ! द्वित्रेषु मेधासम्पन्नेषु चाणक्यादन्यः कः विद्यते ?

कुल० : आर्य ! एकः वररुचिः अस्ति । सोऽपि रुचिरां नीतिं दधाति, कार्यदक्षश्च विद्यते ।

आ० मा० : शाणघर्षितं स्वर्णं तेजसापूर्णं भवति । विद्यया परिष्कृताः छात्रास्तथैव शोभाभिभूताः भवन्ति ।

क्षेत्र में बीजों का गिरना समान रूप से होता है पर उर्वरक की विभिन्नता से अङ्कुरों में विभिन्नता पायी जाती है ।।११।।
और फिर मेधाक्षेत्र पूर्वजन्मार्जित शक्ति से विशिष्टता को प्राप्त होता है । मेधा के विकास के अन्यान्य भी कारण हैं ।

आ० मा० : आर्य ! मैं तो समझती हूँ कि अभ्यास में न्यूनाधिक्य भी इसका कारण है ।

कुल० : उसका भी उसमें योग है ।

आ० मा० : (कुछ विचार कर स्वगत) परमोदार होने के कारण आर्य अपने योग (परिश्रम) को नहीं प्रकाशित करते ऐसा मैं समझती हूँ । (प्रकाश) आर्य ! दो तीन तेजस्वियों में चाणक्य के अतिरिक्त अन्य कौन है ?

कुल० : आर्य ! एक वररुचि है, वह भी रुचिर नीति धारण करता है तथा कार्यदक्ष भी है ।

आ० मा० : शाण पर घर्षित सोना तेज से पूर्ण होता है । विद्या से परिस्कृत छात्र उसी प्रकार शोभा सम्पन्न हो जाते हैं ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कुल : (स्वगतम्) अस्या आश्रम व्यवस्थाऽपि कारण भूता। (किञ्चिद्विचार्य) अद्य छात्रावासस्य व्यवस्था द्रष्टव्या (प्रकाशम्) आर्ये! चलतु मया सार्धम् अन्तेवासिनामावास भवनं पश्यावः।

आ० मा० : यथा रोचते भवते (इति निष्क्रान्तौ)
(ततः प्रविशति दर्भोन्मूलनपरश्चाणक्यः)

चाणक्यः : (पादयोर्नद्धात् दर्भाङ्कुरात् कष्टानुभवं नाटयित्वा भूमौ पश्यन् आत्मगतम्) अद्य दर्भोन्मूलनं करिष्यामि। यतः–

दर्भाङ्कुराणि वनमध्य गतानि तीक्ष्णा-
न्याभाति शत्रुसदृशानि तिरोहितानि।
पादान् विभिद्य रुधिरार्द्रमुखानि भूत्वा
कष्टं किरन्ति सततं किल जीवलोके ॥१२॥

(इति दर्भमूलं खनति)
(ततः प्रविशति आश्रम माता सह कुलपतिः)

कुलपतिः : (चाणक्यं दर्भोन्मूलने संसक्तं दृष्ट्वा आत्मगतम्) अये! चाणक्योऽयं दर्भोन्मूलने संलग्नोऽस्ति सर्वे ब्रह्मचारिणस्तु विश्रामार्थं आश्रमे गताः। परमयं कथमत्र

कुल० : (स्वगत) इनकी आश्रम व्यवस्था भी इसमें कारणभूत हैं। (कुछ विचार कर) आज छात्रावास की व्यवस्था देखनी है (प्रकाश) आर्ये! तुम मेरे साथ चलो हम दोनों छात्र निवास देखें।

आ० मा० : आपकी जैसी इच्छा (इस प्रकार दोनों निकल जाते हैं)
(इसके बाद कुश उखाड़ने में संलग्न चाणक्य का प्रवेश)

चाण० : (पैरों में लगे दर्भांकुर से कष्ट का अनुभव करने का अभिनय करके भूमि पर देखता हुआ आत्मगत) आज मैं कुशों को समूल नष्ट कर दूँगा। क्योंकि

वनमध्य स्थित तीक्ष्ण दर्भांकुर छिपे हुए शत्रु के सदृश दीखते हैं। वे पैरों को छेदकर रक्त से आर्द्र मुखवाला होकर जीवलोक को सदा कष्ट प्रदान करते हैं ॥१२

(इस प्रकार दर्भमूल को खोदने का अभिनय करता है।)
(इसके बाद आश्रम माता के साथ कुलपति का प्रवेश)

कुल० : (दर्भोन्मूलन में संसक्त चाणक्य को देखकर आत्मगत) यह चाणक्य दर्भोन्मूलन में संलग्न हैं। सभी ब्रह्मचारी तो विश्राम करने के लिए आश्रम में गये हैं) लेकिन यह क्यों यहाँ

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दर्भोन्मूलने संलग्नोऽस्ति। अद्य कुशोत्पाटिनी अमावास्याऽपि नास्ति, यस्यां खलु आश्रम वासिभिर्वैदिकधर्मानुयायिभिश्च वर्षपर्यन्त - ज्ञानयज्ञ - क्रियायज्ञादि - सम्पादनार्थं कुशाः उत्पाट्यन्ते। (किञ्चिद्विचार्य आश्रममातरं प्रति) आर्ये! अति परिश्रमेणायं दर्भाणामुन्मूलनं करोति। नूनमयं परम तेजस्वी विघ्नानपरिगणयन् स्वानि सर्वाणि कार्याणि सम्पादयिष्यति।

आ० मा० : अयं धीरः गंभीरः दृढ़प्रतिज्ञश्च प्रतीयते।

कुल० : (चाणक्यं प्रति) अये चाणक्य! किमत्र क्रियते त्वया ?

चाण० : (सहसा परावर्त्य तौ गुरुजनौ दृष्ट्वा साञ्जलिः प्रणिपत्य) गुरुदेव! एभिः दर्भाङ्कुरैः क्षतौ ममपादौ रुधिरविलग्नौ जातौ। मया चिन्तितं यत एभिः आश्रमवासिनोजनाः पीड़िताः भवन्ति भविष्यन्ति च।

आ० मा० : (रुधिरं दृष्ट्वा स्वगतम्) अहह! अतिशयं रुधिरं निःसरति अस्य पादाभ्याम्।

दर्भोन्मूलन में संलग्न है। आज कुशोत्पाटिनी अमावास्या भी नहीं है, जिसमें आश्रमवासियों के द्वारा और वैदिक धर्मानुयायियों के द्वारा वर्ष पर्यन्त ज्ञान-यज्ञ क्रिया यज्ञ आदि सम्पादन के लिए कुश उखाड़े जाते हैं। (कुछ विचार कर आश्रम माता के प्रति) आर्ये! अति परिश्रम से यह दर्भोन्मूलन कर रहा है। निश्चय ही यह परम तेजस्वी विघ्नों की परवाह नहीं करता हुआ अपने सभी कार्यों को सम्पन्न करेगा।

आ० मा० : यह धीर गंभीर एवं दृढ़प्रतिज्ञ प्रतीत होता है।

कुल० : (चाणक्य के प्रति) अये चाणक्य! यहाँ तुम क्या कर रहे हो ?

चाण० : (अचानक मुड़कर दोनों गुरुजनों को देखकर अञ्जलि जोड़े प्रणाम कर) गुरुदेव! इन दर्भांकुरों से क्षत मेरे दोनों पैर रुधिर से विलग्न हैं। मैंने सोचा कि दर्भांकुरों से आश्रमवासी गण पीड़ित होते हैं और होंगे।

आ० मा० : (रुधिर देखकर स्वगत) अहह! इसके पैरों से अतिशय रुधिर निकल रहा है।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चाण० : (सपदि वस्त्रखण्डेन क्षतस्थानं परिवेष्ट्य सोत्साहं) मातः ! अद्य मया अत्रस्थानि सर्वाणि दर्भाणि उत्पाटितानि भविष्यन्ति ! कुतः—

मार्गात्कण्टकिनो वहिः न कुरुते यः स्वात्मभावैः सदा
मार्गे गच्छति कार्यसाधन परः युद्धे जयार्थं तथा ।
यात्रा दुःखयुताऽफला च सकला तस्यात्मनो जीवनं
व्यर्थं भारयुतं भवत्यनुदिनं लोकेऽपि निन्दा परः ॥१३

कुल० : भवान् तु कुशलः । भवादृशा एव भवन्ति निर्भीकाः राष्ट्र-सेवकाः राष्ट्र कल्याणकारिणः आन्दोलन नायकाश्च ।

चाण० : (नतेन मूर्ध्ना साञ्जलिः) श्रीमन् गृहीतमखिलं भवतामाशीर्वचः । कृतज्ञोऽस्मि । राष्ट्रं प्रति जागरूकोऽस्मि ।

कुल० : चाणक्य ! विश्राम वेलेयम् । आवाभ्यां सहैव चलतु आश्रमम् ।

चाण० : यदाज्ञापयति श्रीमन् । (इति पात्रस्थं तक्रं दर्भमूले सत्वरं दातुमभिनयति)

चाण० : (शीघ्र ही क्षतस्थान को वस्त्रखण्ड से लपेट कर उत्साह के साथ) माता, आज मैं यहाँ के सारे कुशों को उखाड़ डालूँगा । क्योंकि—

जो स्वात्मभाव से मार्ग के कण्टकों को बाहर निकाल कर फेंक नहीं देता तथा जो कार्यसाधन रत युद्ध में विजय के लिए गमन करता है, उसकी यात्रा दुःखपूर्ण तथा निष्फल होती है, साथ ही साथ उसका जीवन भारयुक्त हो जाता है एवं वह प्रतिदिन लोक में निन्दा का पात्र हो जाता है ॥१३

कुल० : आप तो कुशल हैं । आप के ऐसे ही निर्भीक राष्ट्र सेवक राष्ट्र कल्याणकारी एवं आन्दोलन नायक होते हैं ।

चाण० : (मस्तक झुका कर अञ्जलि बाँधे) भगवन् ! मैंने आपके सारे आशीर्वचनों को ग्रहण किया । मैं कृतज्ञ हूँ तथा राष्ट्र के प्रति जागरूक हूँ ।

कुल० : चाणक्य ! यह विश्राम का समय है । हम दोनों के साथ ही तुम आश्रम चलो !

चाण० : श्रीमान् की जो आज्ञा । पात्रस्थ तक्र को कुशमूल में शीघ्र डालने का अभिनय करता है)

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कुल० : (दृष्ट्वा) अन्तेवासिन्! किमिदम् ?
चाण० : गुरुवर! तक्रमिदम् ?
कुल० : किं प्रयोजनमस्य ?
चाण० : गुरुदेव! समूलोन्मूलनमेव कुशानां पथिकेभ्यः कल्याणाय भवति। तक्रेण दर्भमूलं विनश्यति। कुतः-

रोगस्य नाशने मूलं शीघ्रमौषधमुत्तमम्
उन्मूलने तु दर्भाणां तक्रमेवास्ति केवलम् ॥१४

कुल० : (स्वगतम्) नूनमयं परमतेजस्वी युवा अस्ति। अयमपरेषां तेजः न सहते। चिरंजीवतु राष्ट्रोन्नत्यै। (प्रकाशम्) ज्ञातं मया दृढ़प्रतिज्ञोऽसि। चलतु वयं चलामः (इति सर्वे निष्क्रान्ताः)

(दर्भोन्मूलनं नाम प्रथमोऽङ्कः समाप्तः)

कुल० : (देखकर) प्रिय शिष्य यह क्या है ?
चाण० : गुरुवर! यह तक्र हैं।
कुल० : इसका क्या प्रयोजन है ?
चाण० : गुरुदेव! कुशों को समूल उखाड़ना ही पथिकों के कल्याण के लिए होता है। तक्र से दर्भमूल भी नष्ट हो जाता है। क्योंकि रोग के नाश करने में शीघ्र औषध का प्रयोग उत्तम है। कुशों के उन्मूलन में तक्र ही केवल उपयुक्त है ॥१४
कुल० : (स्वगत) निश्चय ही यह परम तेजस्वी युवक है। यह दूसरों के तेज को नहीं सह सकता। राष्ट्र की उन्नति के लिए वह दीर्घायु हो। (प्रकाश) मैंने समझा—दृढ़ प्रतिज्ञ हो। चलो चलो हम लोग चलें। (इस प्रकार सभी चले जाते हैं।

(दर्भोन्मूलन नाम का प्रथम अंक समाप्त)

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

द्वितीयोऽङ्कः

(ततः प्रविशतः कुसुमावचयं नाटयन्तौ सेवकौ)

सुमुखः : भद्रमुख ! अद्य राजभवने विशिष्टोत्सवो भविष्यति किम् ?

भद्रमुखः : किं न ज्ञायते त्वया यदद्य तत्र राजकीय महोत्सवस्य आयोजनमस्ति ?

सुमुखः : श्रुतं तु मया तत्रोत्सवस्यायोजनं परं किन्निमित्तमिदमायोजनं वर्तते इति न जाने ।

भद्रमुखः : अहमपि इदमेव जानामि यदद्य राजगेहे उत्सवस्यायोजनमस्ति । अस्मादृशेन चतुर्थवर्गीयेन सेवकेन किं वाधिकं ज्ञातुम् ।

सुमुखः : मित्र ! भवति राजगेहे उत्सवः परमविरलकार्यासक्ता वयं तद्दिने श्रमार्त्ताः भवामः । राज्येन च नाधिकं पारितोषिकं दीयते सेवकेभ्यः ।

भद्रमुखः : इयं तु प्रभुवर्याणां शोषणनीतिः । किं कुर्मः । कार्यसम्पादनं तु आवश्यकमेव ।

द्वितीय अंक

(इसके बाद फूल चुनने का अभिनय करते हुए दो सेवकों का प्रवेश)

सुमुख : भद्रमुख ! राजभवन में आज विशिष्ट उत्सव होगा क्या ?

भद्रमुख : क्या तुम नहीं जानते हो कि आज वहाँ राजकीय महोत्सव आयोजित है ।

सुमुख : मैंने तो सुना कि वहाँ उत्सव का आयोजन है लेकिन किसलिए उत्सव का आयोजन है यह नहीं जानता ।

भद्रमुख : मैं भी इतना ही जानता हूँ कि राजभवन में उत्सव का आयोजन है। हमलोग चतुर्थवर्गीय सेवकों को अधिक जानने से फायदा क्या ।

सुमुख : मित्र ! राजभवन में उत्सव का आयोजन तो होता है लेकिन अविरल कार्य में आसक्त हमलोग काफी थक जाते हैं। राज्य की ओर से सेवकों को इस अवसर पर अधिक पारितोषिक भी नहीं दिया जाता ।

भद्रमुख : यह तो राजा की शोषण नीति है। क्या करें ? कार्य सम्पादन तो आवश्यक ही है ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सुमुखः : (केकारवं श्रुत्वा) अये ! कथं केकावरम् ? किं दुर्दिनं संवृत्तम् ?

भद्रमुखः : (आकाशमवलोक्य) आकाशे मेघमाला विराजते। चलतु-शीघ्रं राजभवने चलतु। (इति निष्क्रान्तौ)

(ततः प्रविशति महाराजस्य नन्दस्यैको विक्षुब्धः पण्डितः)

पण्डितः : (परिभ्रमन्, स्वगतम्) अद्य राज्ञः नन्दस्य भवने सर्वे ब्राह्मणा निमन्त्रिताः सन्ति। परं नन्दः ब्राह्मणानामादरं न करोति केवलं परम्परामेव पालयति। अहं पण्डितमण्डलया चाणक्यमुपनिमन्त्रयितुं नियुक्तोऽस्मि। कथं राजपण्डिता अपि चाणक्यात् विभ्यति। (किञ्चिद्विचार्य) अवगतं मया, सर्वे जानन्ति चाणक्यस्तु महान् नीतिज्ञः। चाणक्यस्योप-निमन्त्रणेन प्रतीयते पण्डितानां कार्यसिद्धिर्भविष्यति। (विचिन्त्य) अहमपि अनुभवामि यत् :—

वासस्तत्रैव कर्त्तव्यो यत्र सम्मानिताः प्रजाः
निराद्रिताः बुधा यत्र तद्राज्यं परिवर्जयेत् ॥१

सुमुख : (मयूर की आवाज को सुनकर) अये ! कैसे मयूर की आवाज आ रही है। दुर्दिन हो गया क्या ?

भद्रमुख : (आकाश की ओर देखकर) आकाश में मेघमाला विद्यमान है। चलो शीघ्र ही राजभवन में चलें। (दोनों चले जाते हैं)

(इसके बाद राजा नन्द का एक विक्षुब्ध पण्डित प्रवेश करता है।)

पण्डित : (इधर-उधर घूमता हुआ स्वगत) आज राजा नन्द के घर सभी ब्राह्मण निमन्त्रित हैं। लेकिन नन्द ब्राह्मणों का आदर नहीं करता, केवल परम्परा का ही पालन करता है। मैं पण्डित मण्डली की ओर से चाणक्य को निमन्त्रित करने के लिए नियुक्त हूँ। राजपण्डितगण भी चाणक्य से क्यों डरते हैं। (कुछ विचार कर) मैं समझ गया। सभी जानते हैं कि चाणक्य महान नीतिज्ञ है। चाणक्य के निमन्त्रण से लगता है पण्डितों की कार्यसिद्धि होगी (सोचकर) मैं भी अनुभव करता हूँ कि—

वहीं निवास करना चाहिए जहाँ प्रजा सम्मानित हो और जहाँ विद्वान् निराद्रित हों, उस राज्य को छोड़ देना चाहिए ।१

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

—अथवा

हेयो दोषी सदा राजा, न हेयं राज्यमात्मकम्
कण्टं पादात्बुधैर्हेयं, पादो हेयो न कर्हिचित् ॥२

अन्वेषयामि तावत् चाणक्यस्यगृहम्। (परिभ्रमन्) अये! इदमार्य चाणक्यस्य गृहम्। सशिष्यश्चाणक्योऽयं तृणाच्छादिते पर्णकुटीरे विराजते।

कीदृशं सामान्यं सरलञ्च जीवनमस्य विदुषः। परमसौ तेजसा ज्वलन्निवापूर्वां कान्ति विभर्ति। यावत्प्रविशामि (प्रविश्य चाणक्यस्य निकटेगत्वा) आर्य! प्रणमत्येष राजकार्यपालको जनः।

चाणक्यः : सुखमस्तु। इदमासनम। तिष्ठन्तु भवन्तः (इति कुशास्तरणं संकेतयति)

पण्डितः : एष तिष्ठामि (इति उपविशति)

चाणक्यः : अपि कुशली भवान्? वर्धते तव विद्या?

अथवा—

दोषी राजा का सदा परित्याग करना चाहिए, अपना राज्य कभी नहीं छोड़ना चाहिए। पैर से कांटे को निकालकर फेंक देना चाहिए! पैर को कभी नहीं काटकर अलग करना चाहिए ॥२

तबतक मैं चाणक्य का घर खोजता हूँ। (घूमता हुआ) अये! यह आर्य चाणक्य का घर है। शिष्य के साथ चाणक्य तृणाच्छादित पर्णकुटी में विराजमान हैं।

इस महाविद्वान् का कैसा सामान्य एवं सरल जीवन है। लेकिन ये तेज से जलते हुए के समान अपूर्व कान्ति धारण करते हैं! जबतक प्रवेश करता हूँ (प्रवेश करके चाणक्य के निकट जाकर) आर्य! राजकार्य पालक यह जन आपको प्रणाम करता है।

चाणक्य : आपको सुख प्राप्त हो। यह आसन है। आप बैठें। (इस प्रकार कुश की चटाई की ओर संकेत करते हैं।)

पण्डित : मैं बैठता हूँ (बैठ जाता है)

चाण० : आप कुशल तो हैं? आपकी विद्या बढ़ रही है न?

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पण्डितः : सर्वं कुशलं भवत्साऽधीनम् राजसेवायां तु धिया कुण्ठिता एव जायते । तत्र तस्या प्रयोगक्षेत्रं संकुचितं सवाधं च भवति ।

चाण० : (स्वगतम्)–कथं ममाधीनं सर्वं कुशलम् अयं तु नम्रता प्रदर्शनार्थं वाग्व्यवहारः । (प्रकाशम्) सम्प्रति कुतः आयाति भवान् ?

पण्डितः : साम्प्रतं राजगेहादागच्छामि ।

चाण० : (स्वगतम्) राज्ञां दृष्टिः कथमापतिता अत्र । (प्रकाशम्) को नियोगोऽनुष्ठातव्यः ।

पण्डितः : इदमस्ति राजकीयं पत्रम् (इति कञ्चुकात् पत्रं निःसार्यं चाणक्यं प्रयच्छति ।

चाण० : (पत्रं गृहीत्वा उपनेत्रं नेत्रयोः सन्धाय मनसि राजकीय मुद्रयामुद्रितमिदमिति विचारयति)

पण्डितः : आर्य ! कार्यान्तरंसम्पादयितुं गन्तुमिच्छामि ?

चाण० : एलादिकं सत्कारविशेष गृह्णातु भवान् (इति एलां ददाति)

पण्डितः : (एलां गृहीत्वा स्वगतम्)

पण्डित : सारी कुशलता आप के अधीन है । राजसेवा में तो बुद्धि कुण्ठित हो जाती है । वहाँ उसका प्रयोग क्षेत्र संकुचित एवं वाधापूर्ण होता है ।

चाण० : (स्वगत) मेरे अधीन सारी कुशलता कैसे है । यह वाग्व्यवहार तो विनम्रता प्रदर्शन के लिए है । (प्रकाश) इस समय आप कहाँ से आ रहे हैं ?

पण्डित : इस समय मैं राजभवन से आ रहा हूँ ।

चाण० : (स्वगत) राजा की दृष्टि यहाँ कैसे पड़ी । (प्रकाश) क्या आज्ञा है ?

पण्डित : यह राजकीय पत्र है (इस प्रकार कञ्चुक से पत्र निकाल कर चाणक्य को देता है ।)

चाण० : (पत्र को लेकर उपनेत्र को आँखों से लगा राजकीय मुद्रा से मुद्रित यह पत्र है ऐसा मन में विचार करता है ।)

पण्डित : आर्य ! अन्य कार्यसम्पादनार्थ मैं जाना चाहता हूँ ।

चाण० : इलायची आदि सत्कार विशेष को आप ग्रहण करें (एला देते हैं)

पण्डित : (इलायची लेकर स्वगत)

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विदुषामादरं नित्यं सत्कारार्थं प्रयोजितम्
एलादानं तु सभ्यानामाभिजात्यार्थ सूचकम् ।।३

(साञ्जलिः प्रकाशम्) गन्तुकामो जनः प्रणमति ।

चाण० : गम्यतामर्थ सिद्धये ।

(पण्डितः साञ्जलिः निष्क्रान्तः)

चाण० : (पत्रस्यावशिष्टांशं वाचयित्वा आत्मगतम्) अद्य राजगेहे आयोजिते समारोहे सर्वे ब्राह्मणाः निमन्त्रिताः सन्ति । अहमपि निमन्त्रितोऽस्मि । परं नन्दस्तु नीतिशून्यः इति सर्वविदितम् । कुतः—

उत्तमेनाथ कार्येण राजते रञ्जनादिह
अन्यथा हीन कर्मत्वात् राजापतति निश्चितम् ।।४

(किञ्चिद्विचार्य) सामान्येन निमन्त्रणं तु ब्राह्मणानां कृते आत्मसम्माननाशकं भवति । परमिदमस्ति राजकीयं पत्रम् । राजाज्ञा पालनीया इति नीतिः । तत्रावश्यमुपस्थातव्यमस्माभिः । यतोहि—

सत्कार के लिए प्रयुक्त सभ्यों का, विद्वानों का आदर इलायची प्रदान आभिजात्य अर्थ का सूचक है ।।३

(हाथ जोड़कर प्रकाश) जाने की इच्छा रखने वाला यह व्यक्ति आपको प्रणाम करता है ।)

चाण० : अपनी अर्थसिद्धि के लिए आप जाएँ ।

(पण्डित हाथ जोड़े हुए निकल जाता है)

चाण० : (पत्र के अवशिष्ट अंश को पढ़कर आत्मगत) आज राजभवन में आयोजित समारोह में सभी ब्राह्मण निमन्त्रित हैं । मैं भी निमन्त्रित हूँ । लेकिन नन्द तो नीतिशून्य है यह सर्वविदित है । क्योंकि—

उत्तम कार्य सम्पादन करने से प्रजारञ्जन के कारण राजा विभूषित होता है अन्यथा हीन कर्म के कारण वह निश्चय ही गिर जाता है ।।४

(कुछ विचार कर) सामान्य रूप में निमन्त्रण तो ब्राह्मणों के लिए आत्म सम्मान नाशक होता है लेकिन यह तो राजकीय पत्र है । राजाज्ञा पालनीय होती है ऐसी नीति है । इसलिए वहाँ अवश्य ही उपस्थित होना चाहिए । क्योंकि—

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रजानामिह सम्बन्धः राज्ञा तावच्च भूतले
यावद्रास्यासनस्थोऽसौ राजते राजमण्डले ॥५

तथा च—

धर्मशून्योऽपि यो राजा नीतिशून्यो नृपासने
यावत्तिष्ठति सम्बन्धः प्रजायास्तेन निश्चितः ॥६

(निकटे कुशासनस्थमपि सुशासनस्थं पाठरतं शिष्यं सम्बोध्य) श्रुतिधर ! इहागच्छ ।

श्रुतिधरः : आचार्य ! समुपस्थितोऽस्मि (इति सत्वरमागच्छति)

चाण० : अद्य राजभवने आयोजिते समारोहे त्वयाऽपि मयासार्धं गन्तव्यम् ।

श्रुतिधरः : (आत्मगतम्) प्रतीयते अद्य गुरोः विशिष्टा कृपा ममोपरि अस्ति। राजकीये समारोहे मम गुरवोऽपि सम्मानिताः भविष्यन्ति । अहं तु मन्ये ! अहमेव सम्मानितो भविष्यामि । शिष्यास्तु तेनैव गुरोः गौरवेन सम्मानिताः भवन्ति । यतो हि—

इस संसार में प्रजा का राजा से तबतक सम्बन्ध रहता है जब तक राजा राज्यसिंहासन पर आरूढ़ राजमण्डल में विभूषित रहता है ॥५॥ और भी—

धर्मशून्य अथवा नीतिशून्य भी राजा जबतक राजसिंहासनारूढ़ है तबतक प्रजा का उसके साथ सम्बन्ध निश्चित रूप में रहता है ॥६

(निकट में कुशासन पर बैठे भी सुन्दर उपदेश से युक्त पाठ में संलग्न शिष्य को सम्बोधित कर) श्रुतिधर ! यहाँ आओ ।

श्रुतिधर : आचार्य ! मैं उपस्थित हूँ । (इस प्रकार वह शीघ्र ही आ जाता है ।)

चाण० : आज राजभवन में आयोजित समारोह में तुम भी मेरे साथ चलना ।

श्रुतिधर : (आत्मगत) लगता है आज गुरु की मेरे ऊपर महती कृपा है । राजकीय समारोह में मेरे गुरुजी भी सम्मानित होंगे । मैं तो समझता हूँ उससे मैं ही सम्मानित होऊँगा । शिष्य तो गुरु के उस गौरव से ही सम्मानित होते हैं । क्योंकि—

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गुरवो सम्मानिताः यान्ति शिष्योत्कर्षेण सर्वदा
शिष्याणामपि सम्मानः गुरुभ्यः प्राप्यते ध्रुवम् ॥६

(प्रकाशम्) यथाज्ञापयति श्रीमन् ।

चाण० : पुस्तकं कमण्डलुञ्च गृहाण । मया सह चल ।

श्रुतिधरः : यथाज्ञापयति श्रीमन् (अग्रे अग्रे चरणपादुकारूढ़ः खट्खटा-शब्दं कुर्वन् चाणक्यश्चलति श्रुतिधर पुस्तकं कमण्डलुञ्च गृहीत्वा पश्चात् गच्छति । निष्क्रान्तौ)

(ततः प्रविशति विजया जया च)

विजया : सखि ! अस्मिन् उद्याने किञ्चिद्भ्रमतु । कार्याधिक्यात् श्रान्ताऽस्मि !

जया : सत्यं, राजभवने विशेषोत्सवे कार्यं कर्तॄनामुत्सवो न जायते ।

विजया : (भ्रमन्ती) सखि ! किं राजभवने आयोजितस्य समारोहस्य वृत्तमवगतं त्वया ?

सदा शिष्य के उत्कर्ष से गुरुगण सम्मानित होते हैं । निश्चय ही शिष्यों को सम्मान गुरु के लिए ही प्राप्त होता है ॥७

(प्रकाश) श्रीमान् की जो आज्ञा ।

चाण० : पुस्तक और कमण्डलु ले लो । मेरे साथ चलो ।

श्रुतिधर : आप की जैसी आज्ञा । आगे आगे चरणपादुका पहने खट् खट् शब्द करते हुए चाणक्य चलते हैं । पुस्तक और कमण्डलु को लेकर श्रुतिधर उनके पीछे जाता है । दोनों निकल जाते हैं ।

(इसके बाद विजया एव जया का प्रवेश)

विजया : सखि ! इस उद्यान में कुछ भ्रमण करो । कार्याधिक्य के कारण मैं थक गयी हूँ ।

जया : सचमुच राजभवन में विशेषोत्सव रहने पर कार्यकर्ताओं में उत्सव नहीं होता ।

विजया : (घूमतीं हुई) सखि ! क्या राजभवन में आयोजित इस समारोह वृत्तान्त को तुम जानती हो ?

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

जया : वयमन्तःपुरस्था वहिः किं भवतीति केवलं शृण्मः नावगच्छामः। किमस्मिन् समारोहे कापि नूतना वार्ताऽभूत् ? यदि जानासि तर्हि कथय ?

विजया : सखि ! अद्य अस्मिन् समारोहे राजकीय भोजनस्यापि आयोजनमस्ति।

जया : प्रायः राजकीये समारोहे तु भोजनस्यायोजनं भवत्येव तर्हि किं वैशिष्ट्यम।

विजया : सखि ! अस्मिन् राजकीय भोजने राज्याधिकारिणस्तु आमन्त्रिता एव चाणक्यरहिताः सर्वे विद्वान्सो ब्राह्मणाः अपि निमन्त्रिताः सन्ति।

जया : ब्राह्मणानां भोजनमिति तु अस्माकं सांस्कृतिकी परम्परा। राज्याधिकारिणस्तु एतादृशे समारोहे प्रधानभूताः। एतेषामधिकार क्षेत्रे भोजनमपि एकं वर्तते। किमधिकं सम्वृत्तम्। (किञ्चिद्विचार्य) आम् अवगतम्। अत्र चाणक्यो न निमन्त्रितः इत्यस्ति वार्ता किम् ?

जया : हमलोग अन्तःपुर में स्थित रहने वाली बाहर क्या होता है यह केवल सुनते हैं जानते नहीं। क्या इस समारोह में कोई नयी बात हुई ? यदि जानती हो तो कहो।

विजया : सखि ! आज इस समारोह में राजकीय भोजन का भी आयोजन है।

जया : प्रायः राजकीय समारोह में तो भोजन का आयोजन होता ही है तो विशेषता क्या है ?

विजया । सखि ! इस राजकीय भोजन में राज्याधिकारी तो आमन्त्रित हैं ही चाणक्य से रहित सभी विद्वान् ब्राह्मण भी निमन्त्रित हैं।

जया : ब्राह्मणों का भोजन तो हम लोगों की सांस्कृतिक परम्परा है। राज्य पदाधिकारी तो इस प्रकार के समारोह में प्रधान स्थान ग्रहण करते हैं। इन लोगों के अधिकार क्षेत्र में भोजन भी एक है। इससे क्या अधिक बात हो गयी (कुछ विचार कर) हाँ समझी, यहाँ चाणक्य निमन्त्रित नहीं है यही बात है क्या ?

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विजया : इयमेव वार्ता अस्ति ।

जया : कथं चाणक्यो न आहूतः ?

विजया : सखि ! श्रूयते चाणक्यो महान् वेदज्ञः, सनातनधर्म रक्षाव्रती कुशाग्रबुद्धिः । अतएव राजा तस्माद्द्वेष्टि ।

जया : राजपण्डिताः कथं न मन्त्रयन्ति राजानं येन राजा सन्मार्गानुयायी भवतु ।

विजया : किं कथयामि सखि ! पण्डितानां मध्ये सौहार्दस्याभावो दृश्यते सत्यं—

पण्डितानां हि पाण्डित्यं सदा स्वोत्कर्षवर्णने
परेषां विभवं दृष्ट्वा द्वेषाग्नौ हि ज्वलन्ति ते ।।८

चाणक्यप्रभावधर्षितास्ते राजसम्मानलुब्धाः पण्डिताः सदैव नेच्छन्ति राज्य भवने चाणक्यस्य प्रवेशम् । अतः पण्डिताः राजानं तादृशं मन्त्रयन्ति येन राज्ञः कृपादृष्टिः चाणक्यस्योपरि न गच्छति ।

विजया : यही बात है ।

जया : चाणक्य क्यों नहीं बुलाये गये ?

विजया : सखि ! सुना जाता कि चाणक्य महान् वेदज्ञ हैं, सनातन धर्म रक्षाव्रती है, कुशाग्र बुद्धि है । अतएव राजा उससे द्वेष करता है ।

जया : राजपण्डितगण क्यों नहीं मन्त्रणा देते जिससे राजा सन्मार्गानुयायी हो ।

विजया : क्या कहूँ सखि ! पण्डितों के मध्य भी सौहार्द का अभाव है । सचमुच पण्डितों का पाण्डित्य सदा अपने उत्कर्ष वर्णन में रहा है । वे दूसरे के विभव को देखकर द्वेषरूपी अग्नि में जलते हैं ।।८

चाणक्य के प्रभाव से धर्षित वे राज्य सम्मान के लोभी पण्डित सर्वदा यह नहीं चाहते कि राजभवन में चाणक्य का प्रवेश हो । इसीलिए पण्डितगण राजा को इस प्रकार की मन्त्रणा देते है जिससे राजा की कृपादृष्टि चाणक्य के ऊपर न पड़े ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

जया : तदा राजाऽपि सत्यासत्य विवेक रहितः प्रतीयते। किंमुत् न जानाति चाणक्यम् ?

विजया : राजा तु नेत्राभ्यां सहितोऽन्धः, पादाभ्यां युक्तोखंजः कर्णाभ्यां समन्वितोऽपि बधिरो भवति। इदमपि अस्ति यत् राजा चाणक्यात् द्वेष्टि। अतएव राजाज्ञा निर्गता यत् चाणक्यं विना सर्वेपण्डिताः अस्मिन् राजकीय सम्माने निमन्त्रिता भवन्तु। स चाणक्यं द्रष्टुं नेच्छतीति प्रतीयते।

जया : सम्प्रति चलतु सखिः राजभवनम्। तत्रोत्सवः द्रष्टव्यः।

(निष्क्रान्ते)

(आनन्दोत्सवः, सर्वे राजानः पदाधिकारिणो ब्राह्मणाश्च यथासने विराजन्ते। राजानन्दः प्रोच्चमयूरसिंहासने समासीनः सभापतित्वं करोति। ततः प्रविशति एकं पिञ्जरं गृहीत्वा पत्रेणसह भृत्यः। पिञ्जरे विशालकायः सिंहो विराजते।)

भृत्य : (सिंहासनस्य अधोभागे पिञ्जरं स्थापयित्वा) जयतु महाराजः।

राजा : कथयतु किमस्ति ?

जया : तब तो राजा भी सत्यासत्य विवेक से रहित है, ऐसा प्रतीत होता है। क्या वह चाणक्य को नहीं जानता ?

विजया : राजा तो नेत्रों से युक्त होने के बाद भी अन्धा, पैरों से युक्त होने के बाद भी लंगड़ा तथा कानों से युक्त होने के बाद भी बहरा होता है। यह भी है कि राजा चाणक्य से द्वेष करता है। इसलिए राजाज्ञा निकली कि चाणक्य के बिना सभी पण्डित इस राजकीय सम्मान में निमन्त्रित हों। वह चाणक्य को देखना नहीं चाहता है।

जया : इस समय सखि ! राजभवन चलो, वहाँ उत्सव देखें।

(दोनों निकल जाती हैं)

(आनन्दोत्सव, सभी राजागण, पदाधिकारी एवं ब्राह्मण लोग अपने-अपने आसन पर सुशोभित हैं। राजा नन्द उच्च मयूर सिंहासन पर समासीन होकर सभापतित्व करता है। इसके बाद पत्र के साथ पिंजरे को लेकर एक भृत्य का प्रवेश। पिञ्जरे में एक विशालकाय सिंह है।

भृत्य : (पिंजरे को सिंहासन के नीचे रखकर) महाराज की जय हो।

राजा : कहो क्या बात है ?

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भृत्यः । इदमेकं पत्रं विद्यते महाराज शत्रुदमनस्य । (इति पत्रं समीपस्थं राजपुरुषं ददाति । राजपुरुषः तत्पत्रं गृहीत्वा राजानं प्रयच्छति ।

राजा : (पत्रं गृहीत्वा पठितुमभिनयं कृत्वा सहर्षं स्वगतम्) अये ! सम्प्रति तु विनोदस्य वार्ता आगता । (भृत्यं प्रति) त्वं स्वनियोगमशून्यं कुरु ।

भृत्यः : यथाज्ञापयति देव ! (इति सप्रणामं निष्क्रान्तः)

राजा : (पिञ्जरस्थं सिंहं दृष्ट्वा साश्चर्यं स्वगतम्) अयं विशालकायः सिंहः पिञ्जरे बद्धो वर्तते । अनुद्घाटिते द्वारे वहिः करणं कथं संभवम् (विचार्य प्रकाशम्) अये मन्त्रिन् ! शत्रुदमन सकाशात् एषः पिञ्जरबद्धः सिंहः अधुनैव समागतः । अनुद्घाटिते द्वारे वहिः करणीय इति वार्ता विद्यते ।

मन्त्री : (पिंजरस्थं सिंहं दृष्ट्वा) राजन् ! एतादृशो विशालकायः सिंहः अनुद्घाटिते द्वारे कथं वहिर्भविष्यति ।

राजा : सभायां उद्घुष्यताम् अस्ति कोऽपि अस्या सभायां तीक्ष्णबुद्धिः यः एनं अनुद्घाटिते द्वारे वहिः करिष्यतीति ।

भृत्य : महाराज शत्रुदमन का यह एक पत्र है । (पत्र को वह समीप स्थित राजपुरुष को देता है । राजपुरुष उस पत्र को लेकर राजा को देता है ।)

राजा : (पत्र को लेकर, पढ़ने का अभिनय कर सहर्ष स्वगत) अये ! इस समय तो विनोद की बात आ गयी । (भृत्य के प्रति) तुम अपने स्थान पर जाओ ।

भृत्य : देव की जो आज्ञा ! (प्रणाम के साथ निकल जाता है)

राजा : (पिञ्जर स्थित सिंह को देखकर आश्चर्य के साथ स्वगत) यह विशालकाय सिंह पिञ्जरे में बन्द है विना द्वार खोले इसे बाहर करना कैसे सम्भव है । (विचार कर प्रकाश) अये ! मन्त्री शत्रुदमन के पास से यह पिञ्जरबद्ध सिंह अभी आया है । विना द्वार खोले ही सिंह को बाहर करना है ।

मन्त्री : राजन् ! इतना विशाल सिंह पिञ्जरे में बन्द है विना द्वार खोले कैसे बाहर होगा ।

राजा : सभा में उद्घोषणा कीजिए । इस सभा में कोई ऐसा है जो विना द्वार खोले ही इस सिंह को बाहर कर सकता है ऐसा ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मन्त्री : यथाज्ञापयति देवः (उत्थाय) भो भो बुद्धिमन्तः सभासदः ! भवत्सु कोऽस्ति यः एनं सिंहं अनुद्घाटितेऽपि द्वारे वहिः करिष्यतीति ।

सर्वे : दृष्ट्वा (समवेतस्वरेण) असंभवम्, असंभवमिदं कार्यम् ।

राजा : (एतादृशमुत्तरं श्रुत्वा सक्रोधम्) मम राज्ये एतादृशः नास्ति कोऽपि बुद्धिमान् यः शत्रुदमनप्रेषितस्य प्रश्नस्य समाधानं करोतु ।

(एकः बालकः सहसा उत्थाय पिञ्जरस्य निकटे गत्वा निपुणं निरीक्ष्य)

बालकः : अहं एनं सिंहं अनुद्घाटितेऽपि द्वारे वहिः करिष्यामि ।

सर्वे : असम्भवम्, असम्भवम् ।

राजा : (स्वगतम्) अये ! बालकः किं वहिः करिष्यति (प्रकाशम्) अये बालक ! यदि त्वं एनं सिंहं अनुदघाटित्ते द्वारे न वहिः करिष्यसि तदा दण्डमवाप्स्यसि ।

बालकः : (सगर्वम्) यदि वहिः करिष्यामि तदा ?

राजा : (सस्मितम्) इदं सिंहासनं ते भविष्यति ।

मन्त्री : जो आपकी आज्ञा (उठकर) हे बुद्धिमान् सभासदों आप लोगों में कोई ऐसे हैं जो इस सिंह को बिना द्वार खोले बाहर निकाल सकते हैं ?

सभी : देखकर (समवेत स्वर में) असंभव, यह कार्य असंभव है ।

राजा : इस प्रकार का उत्तर सुनकर क्रोध के साथ) मेरे राज्य में कोई ऐसा बुद्धिमान् नहीं है जो शत्रुदमन द्वारा प्रेषित प्रश्न का समाधान कर सके ।

(एक बालक अचानक उठकर पिञ्जरे के निकट जाकर ठीक ढंग से देख)

बालक : मैं इस सिंह को बिना द्वार खोले ही बाहर कर सकता हूँ ।

सभी : असंभव, असंभव ।

राजा : (स्वगत) यह लड़का क्या इसे बाहर करेगा । (प्रकाश) अये बालक ! यदि तुम इस सिंह को बिना द्वार खोले बाहर नहीं करोगे तो दण्ड पाओगे ।

बालक : (गर्व के साथ) यदि बाहर कर दूँगा तब ?

राजा : (हँसते हुए) यह सिंहासन तुम्हारा हो जायगा ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सर्वे : (स्वगतम्) इयं राज्ञः प्रमत्त प्रतिज्ञा ।

बालकः : (सहर्षं पिञ्जरस्य निकटे गत्वा स्वगतम्) अहह सिंहोऽयं लाक्षया निर्मितः । आनयामि एकं तप्तलौहदण्डम् । तस्य लौहदण्डस्य सम्पर्केण लाक्षा शिथिलं पानीयसदृशं भूत्वा वहिः आगमिष्यति । (सत्वरमेकं तप्त लौहदण्डमानयति)

सर्वे : (स्वगतम्) अनेन तप्तलौहदडेण्न किं करिष्यति ।

बालकः : (तप्तलौहदण्डेन सिंहं स्पृशति ततः लाक्षामयः सिंहः उष्णाधिक्यात् द्रवीभूय वहिः पतितः)

सर्वे : (साश्चर्यम् स्वगतम्) सत्यं बद्धिमानयं बालकः, तेजस्वी च ।

राजा : (स्वगतम्) सत्यं सिंहः पिञ्जरे नास्ति ।

बालकः : राजन् सम्प्रति कुत्र मम सिंहासनम् ?

राजा : (मन्त्रिण प्रति) कोऽयं बालकः ?

मन्त्री : (कर्णे) अयं मुरायाः पुत्रश्चन्द्रगुप्तः ।

राजा : कथमत्रागतः । दूरे नयत एनम्

सर्वे : (स्तब्धाः स्वगतम्) राज्ञः निर्णयोऽयमनीतिपूर्णः ।

बालक : किमिदं न्याय संगतम् ।

सभ : (स्वगत) राजा की यह उन्मत्त प्रतिज्ञा है ।

बालक : (हर्ष के साथ पिञ्जरे के निकट जाकर स्वगत) अहह यह सिंह लाह का बना हुआ है । एक तप्त लौहदण्ड लाता हूँ । उस लौह के सम्पर्क से लाक्षा पानी के सदृश शिथिल होकर बाहर आ जायगा । (शीघ्र ही एक तप्त लौहदण्ड लाता है ।)

सभी : (स्वगत) इस तप्त लौहदण्ड से क्या करेगा ।

बालक : (तप्त लौह दण्ड से सिंह को स्पर्श कराता है । लाह निर्मित सिंह उष्ण की अधिकता से पिघल कर बाहर हो जाता है ।)

सभी : (आश्चर्य के साथ स्वगत) सचमुच यह बालक बुद्धिमान् तथा तेजस्वी है ।

राजा : (स्वगत) सचमुच सिंह पिञ्जरे में नहीं है ।

बालक : राजन् ! इस समय मेरा सिंहासन कहाँ है ?

राजा : (मन्त्री से) यह बालक कौन है ?

मन्त्री : (कान में) यह मुरा का पुत्र चन्द्रगुप्त है ।

राजा : यहाँ कैसे आ गया । इसे दूर ले जाओ ।

सभी : (स्तब्ध होकर स्वगत) राजा का यह निर्णय अनीतिपूर्ण है ।

बालक क्या यह न्याय संगत है ?

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मन्त्री : (एकं दृढ़पुरुषं सम्बोध्य) राजपुरुष ! नयत एनं बालकम् ।

राजपुरुषः : यथाज्ञापयति देव ! इति बालकं गृह्णाति सभातः बलात् वहिःकर्तुमिच्छति ।

बालकः : दुर्नीत्या विनाशो भवति (इति कथयन् बलात् स वहिः नीयते ।

राजा : (बालकस्य गमनानन्तरं स्वगतम्) कथं वेपते मे हृदयम् (विचिन्त्य) सम्प्रति तु उत्सवस्य समयः । पण्डितसभायाः कार्यं भवतु (प्रकाशम्) सम्प्रति पण्डितानां सभा भविष्यति ।

प्रधान पण्डितः : (उत्थाय) मान्याः विद्वान्सः राजाज्ञा वर्तते यत् सम्प्रति पण्डितानां सभा भवतु । विज्ञापयामि यत् पण्डितानां सभा सभाभवने एव भविष्यति । तत्रैवास्माभिः गन्तव्यमिति । (अग्रे राजा ततः सर्वे निष्क्रान्ताः) ।

(ततः प्रविशति उपहारान् गृहीत्वा विजया)

विजया : (स्वगतम्) अद्य अत्रानेके पण्डिताः सम्मानिताः भविष्यन्ति । सपदि सभाभवने उपहारान् गृहीत्वा मया तत्र गन्तव्यम् ।

(ततः प्रविशति ससंभ्रमा रमा ।)

मन्त्री : (एक दृढ़ पुरुष को सम्बोधित कर) राजपुरुष ! इस बालक को ले जाओ ।

राजपुरुष : देव की जो आज्ञा (बालक को पकड़ता है तथा सभा से बाहर करना चाहता है ।)

बालक : दुर्नीति से विनाश होता है । (इस प्रकार कहता हुआ वह बलपूर्वक बाहर ले जाया जाता है ।

राजा : (बालक के जाने के बाद स्वगत) मेरा हृदय काँप क्यों रहा है सोचकर) यह उत्सव का समय हैं, पण्डित सभा का कार्य हो (प्रकाश) इस समय पण्डितों की सभा होगी ।

प्रधानपण्डित : (उठकर) मान्य विद्वानों ! राजाज्ञा है कि अब पण्डितों की सभा हो । मैं विज्ञापित करता हूँ कि पण्डितों की सभा सभाभवन में होगी । वहीं हम लोगों को चलना चाहिए । (आगे राजा उनके पीछे सभी लोग निकल जाते हैं ।

(इसके बाद उपहारों को लिए विजया का प्रवेश)

विजया : (स्वगत) आज यहाँ अनेक पण्डित सम्मानित होंगे । शीघ्र ही उपहारों को लेकर मुझे सभाभवन में जाना है ।

(इसके बाद घबड़ाई हुई रमा का प्रवेश ।)

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रमा : अये ! अत्याहितम्, अत्याहितम् ।

विजया : सखि ! किमत्याहितम् ?

रमा : किं राजभवनस्य वृत्तं त्वया न श्रुतम् ?

विजया : नहि सखि ! नाहं जानामि राजभवने किं वृत्तं घटितमिति ।

रमा : शृणु सखि ! भृत्योपभृत्यैः श्रुतं मया यत् पण्डितसभायां चाणक्यः राज्ञा तिरस्कृतः ।

विजया : सखि ! मया तु श्रुतं यदस्मिन् समारोहे चाणक्यो नाऽहूतः ।

रमा : यत्र तत्र वार्ता चलति सखि ! यत् केनापि राजविनाश तत्परेण राज्ञः असन्तुष्टेन छलेन राजकीये सम्माने चाणक्यो निमन्त्रितः ।

विजया : किं चाणक्यस्तत्र एकाकी आसीत् ?

रमा : एकः शिष्योऽपि तेन सह आसीदिति श्रुतम्

विजया : चाणक्यतिरस्कारस्य वृत्तं कथं घटितमिति आमूलाच्छ्रोतुमिच्छामि ।

रमा : अये अनर्थ हो गया, अनर्थ हो गया ।

विजया : सखि क्या अनर्थ हो गया ?

रमा : क्या राजभवन की घटना तुमने नहीं सुनी है ?

विजया : नहीं सखि ! मैं नहीं जानती कि राजभवन में क्या घटना घटी ।

रमा : सुनो सखि ! मैंने भृत्यों से सुना कि पण्डित सभा में चाणक्य राजा के द्वारा तिरस्कृत किया गया ।

विजया : सखि ! मैंने तो सुना कि इस समारोह में चाणक्य नहीं बुलाया गया है ।

रमा : जहाँ तहाँ वार्ता चल रही है सखि कि राजा से असन्तुष्ट राज्य विनाश में तत्पर किसी ने छल से चाणक्य को राजकीय सम्मान में निमन्त्रित कर दिया ।

विजया : क्या चाणक्य वहाँ अकेला था ?

रमा : एक शिष्य भी उनके साथ था ऐसा सुना ।

विजया : चाणक्य के तिरस्कार की घटना कैसे घटी उसे मैं प्रारम्भ से ही सुनना चाहती हूँ ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रमा : श्रुतं मया—यदा सर्वे राजानः पण्डिताश्च पण्डित सभाभवने समासीना आसन् तथा प्रोच्च सिंहासनारूढस्य राज्ञः नन्दस्य सभापतित्वे पण्डित सभा सञ्चालिता आसीत् तदा एव सशिष्यः चाणक्यः चरणपादुकारूढः तत्र समुपागतः ।

विजया : ततः किमभूत् ?

रमा : महाराजः तदा दृढाङ्गं तेजसा दीप्तिमन्तं चाणक्यं दृष्ट्वा क्रोधान्धः जातः तथा च सभापतिपदेन तिरस्कारवाक्यैः बहुः प्रलपितवान् ।

विजया : तदा चाणक्यस्य स्थितिः कीदृशी आसीत् ?

रमा : श्रूयते यत् स किंकर्त्तव्यविमूढः चित्रलिखित इव राज्ञा कटुभिः शतवाक्यैरपमानितोऽपि तूष्णीमासीत् ।

विजया : ततस्ततः ?

रमा : तदा राज्ञा नन्देन कथितम्—

कुटिलः कृष्णवर्णाभः कूटनीतिपरायणः
चाणक्यो राज्यसम्मानात् वहिष्कार्योऽधुनात्वरा ॥६

रमा : मैंने सुना—जब सभी राजा एवं पण्डितगण पण्डित सभा-भवन में बैठे थे तथा ऊँचे सिंहासन पर आरुढ़ राजा की अध्यक्षता में पण्डित सभा सञ्चालित थी, उसी समय शिष्य के साथ चाणक्य खड़ाऊँ पर चढ़ा हुआ वहाँ उपस्थित हुआ ।

विजया : उसके बाद क्या हुआ ?

रमा : उसके बाद दृढ़ अंगवाले दीप्तिमान् चाणक्य को देखकर राजा क्रोधान्ध हो गये तथा सभापति पद से उसने अनेक तिरस्कार वाक्यों से प्रलाप किया ।

विजया : उस समय चाणक्य की स्थिति कैसी थी ?

रमा : सुना जाता है वह किंकर्त्तव्यविमूढ़ चित्रलिखित के समान राजा के सैकड़ों कटु वाक्यों से अपमानित होकर भी चुप था ।

विजया : इसके बाद क्या हुआ ?

रमा : तब राजा नन्द ने कहा—कुटिल कृष्णवर्णाभ कूटनीति विचक्षण चाणक्य को इस राजसम्मान से शीघ्र ही इस समय निकाल दिया जाय ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विजया : ततस्ततः ?

रमा : तदा–निमन्त्रणं बिना यज्ञे सत्या प्राप्ता तु या गतिः
सा गतिस्तत्र चाणक्यः प्राप्तवानाप्तपुरुषः ॥१०

विजया : किन्तेन तत्र दाहः कृतः ?

रमा : विदुषामपमानं किमात्मदाहसदृशं न भवति । क्रोधाग्निनाज्वलन्निव वाणविद्धेवाहतः चाणक्यः पण्डित सभाभवनात् सत्वरं सशिष्यः प्रति निवृतः !

विजया : ततस्ततः ?

रमा : ततः परं किमभूत् इति न जाने । अतः राजभवने गमनमेवोचितम् ।

विजया : चलतु सखि !

(उभौ निष्क्रान्तौ)

(ततः प्रविशति सशिष्यः क्रोधोपहतश्चाणक्यः)

चाण० : (स्वगतम्) आः नन्दस्य राज्ये राज्यलोभरहिताः पण्डिता अपि तिरस्क्रियन्ते ! अनर्थकरमिदम्–

विजया : इसके बाद क्या हुआ ?

रमा : उस समय–निमन्त्रण के बिना यज्ञ में पहुँच कर सती ने जो गति पायी थी वही गति आप्तपुरुष चाणक्य ने वहाँ प्राप्त की ॥१०

विजया : क्या उसने वहाँ आत्मदाह कर लिया ?

रमा : विद्वानों का अपमान क्या आत्मदाह के समान नहीं होता । क्रोधाग्नि से जलते हुए के समान वाणविद्ध के समान आहत वह चाणक्य अपने शिष्य के साथ सभाभवन से बाहर चला गया ।

विजया : इसके बाद क्या हुआ ?

रमा : इसके बाद क्या हुआ यह मैं नहीं जानती । अतः राजभवन में चलना ही ठीक है ।

विजया : चलो सखि !

(दोनों निकल जाती है)

(इसके बाद क्रोध से युक्त चाणक्य शिष्य के साथ प्रवेश करता है ।

चाण० : (स्वगत) आः नन्द के राज्य में राज्य लोभ से रहित पण्डित भी तिरस्कृत होते हैं । यह अनर्थकर है–

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पण्डिताः मानमिच्छन्ति राज्यं नेच्छन्ति पण्डिताः
राज्यं त्यक्त्वा वहिर्यान्ति सम्मानार्थं सदा बुधाः ॥११
(चिन्तयन्)
बुद्धिमन्तोहि राज्यस्थाः राज्यकल्याणहेतवे
प्रयत्नं नैव कुर्वन्ति तदान्येषां तु का गतिः ॥१२
(इतस्ततः भ्रमन्) किं पण्डिता अपि चाटुकाराः सम्वृत्ताः ? राजानं कर्त्तव्यमकर्त्तव्यं न संकेतयति। अथवा—
प्रभुत्वमविवेकत्वं मदमत्तकरं परम्
राज्ञा नन्देन कल्याणं राज्येनैव भविष्यति ॥१३
अतः राज्ञः नन्दस्य नाशार्थं बुद्धिश्चाणक्यप्रेरिता
अद्य प्रभृतिमारभ्य नृत्यतु सर्वतः सदा ॥१४
किमधिकम्—ब्राह्मणस्य प्रतिज्ञावाक्यमिदम्—
ब्रह्मवाक्य-सहस्रेण शिववाक्य-शतेन च
विष्णोरसंख्यवाक्येन शिखाबद्धा तु मुच्यते ॥१५
(इति शिखां मोचयति।)

पण्डितगण सम्मान चाहते हैं वे राज्य नहीं चाहते। सम्मान के लिए विद्वान् सदा राज्य त्याग कर बाहर चले जाते हैं ॥११
(सोचता हुआ) राज्य स्थित बुद्धिमान् लोग यदि राज्य कल्याण के लिए प्रयत्न नहीं करते हैं तो दूसरे लोगों की क्या गति है ॥१२
(इधर-उधर घूमता हुआ) क्या पण्डित लोग भी चाटुकार हो गये ? राजा को कर्त्तव्य अकर्त्तव्य का संकेत नहीं करते। अथवा
प्रभुत्व तथा मूर्खता मदमत्त करने वाला होता है। अतः राजा नन्द से इस राज्य का कल्याण नहीं हो सकता ॥१३
अतः राजा नन्द के नाश के लिए चाणक्य प्रेरित बुद्धि आज से लेकर सभी जगह सदा नृत्य करे ॥१४
अधिक क्या—यह ब्राह्मण का प्रतिज्ञा वाक्य है— सहस्र ब्रह्मवाक्य, सैकड़ों शिववाक्य तथा असंख्य विष्णु वाक्य के साथ बँधी हुई यह शिखा खोल दी जाती है ॥१५
(इस प्रकार शिखा खोल देते हैं)

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिष्यः : (स्वगतम्) इदं तु सर्वथा उपयुक्तमभूत्—गुरोः भीषण प्रतिज्ञया नन्दस्य नाशो भविष्यति राज्यकल्याणाय। (गुरोः शिखां दृष्ट्वा) कथं गुरुदेवस्य शिखा कालसर्पिणीव लम्बायमाना दृश्यते।

चाण० : (सक्रोधं शिखां स्पर्शन्) यावत् नन्दस्य नाशो न भविष्यति अत्र कल्याणकारिणो राज्ञः नियुक्तिश्च न भविष्यति ताव-दियं शिखा कालसर्पिणीभूता विचरिष्यति।

(पटाक्षेपः)

(इति शिखामोचनं नाम द्वितीयोऽङ्कः)

शिष्य : (स्वगत) यह तो सर्वथा ठीक हुआ। गुरु जी की भीषण प्रतिज्ञा से नन्द का नाश राज्य कल्याण के लिए होगा। (गुरु की शिखा को देखकर) गुरुदेव की शिखा काल सर्पिणी की भाँति किस प्रकार लटकती हुई दीख पड़ती है।

चाण० : (क्रोध के साथ शिखा का स्पर्श करते हुए) जब तक नन्द का नाश नहीं होगा, यहाँ कल्याणकारी राजा की नियुक्ति नहीं होगी तबतक यह शिखा कालसर्पिणी बनकर विचरण करेगी।

(पटाक्षेप)

(शिखा मोचन नामक द्वितीय अंक समाप्त)

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तृतीयोऽङ्कः

(ततः प्रविशति मुक्तशिखश्चाणक्यः)

चाण० : (स्वगतम्) यत्र बुद्धिरुपेक्षिता अज्ञानस्य वा बाहुल्यं न तत्र शान्तिः। नन्दात्तिरस्कृतोऽहं नानुभवामि शान्तिम् अपमान ज्वालाभिर्दह्यते मे हृदयम्। रात्रौ निद्राऽपि मम पार्श्वे नायाति। प्रतीयते सा कथयति यत् करणीयमद्यैव कुरु। सत्यम्—

निद्रा मानवतीव कोपसहिता तावन्न सन्तिष्ठते
यावन्नार्थप्रकाशकञ्च सकलं कार्यं न सम्पाद्यते।
मानार्हा विजहाति मानमखिलं क्वापीति नो दृश्यते
सत्यं सत्पुरुषं त्यजन्ति सततं कामार्थशून्यं स्त्रियः ॥१

मम बुद्धिस्तु कार्ये सहायिका अस्ति। इयं सहसा कार्यं सम्पादयितुं नोपदिशति। (शिखां परामृशन्) इयं शिखाऽपि मम शिरसः सृता कालसर्पिणीव नित्यं मां कथयति, शीघ्रमेव

(इसके बाद खुली हुई शिखा से युक्त चाणक्य का प्रवेश)

चाण० : (स्वगत) जहाँ बुद्धि उपेक्षित होती है अथवा अज्ञान का बाहुल्य होता है वहाँ शान्ति नहीं। नन्द से तिरस्कृत मैं शान्ति का अनुभव नहीं कर रहा हूँ। अपमान की ज्वाला से मेरा हृदय जल रहा है। रात्रि में निद्रा भी मेरे पास नहीं आती है। लगता है वह कहती है कि जो करना है वह आज ही करो। सचमुच—

मानवती स्त्री के समान क्रोप सहित निद्रा तबतक नहीं ठहरती जबतक प्रयोजन प्रकाशक सभी कार्य सम्पन्न नहीं हो जाते। मानार्हा कभी अपना सम्पूर्ण मान छोड़ेगी ? यह नहीं दीख पड़ता। सचमुच कामार्थ शून्य सत्पुरुष को स्त्रियाँ प्रायः छोड़ दिया करती हैं ॥१॥

मेरी बुद्धि तो कार्य में सहायिका है। यह सहसा कार्यसम्पादन के लिए उपदेश नहीं करती। (शिखा का स्पर्श करते हुए) यह शिखा भी मेरे शिर से बढ़ी हुई काल सर्पिणी के समान नित्य मुझे कहती है, शीघ्र मुझे

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मां दंशयितुं संकेतय इति। (इतस्ततः परिभ्रमन्) सम्प्रति तु पाठनेऽपि मम मनः तादृशं न लगति। सत्यम्—

चिन्तायां निरताः सन्तः प्राणाञ्च त्यक्तुमुद्धताः
दृश्यन्ते भुवि सर्वत्र सामान्यानां तु का कथा ॥२

(परिभ्रमन्) इतस्तु सर्वेजनाः राज्ञः नन्दात् भयार्त्ताः प्रतिभान्ति। कथमस्य राज्यस्य कल्याणं भविष्यति। राज्यस्य कृते कल्याणकारी नायकः अपेक्ष्यते। सम्प्रति तु अस्माभिर्नायको अन्वेष्टव्यः। (नेपथ्याभिमुखमवलोक्य) श्रुतिधर! आगम्यताम्।

(ततः सत्वरं प्रविशति तस्य शिष्यः श्रुतिधरः)

श्रुति० : एषः श्रुतिधरः प्रणमति (इति पादौ स्पृशति)

चाण० : आयुष्मान् भव।

श्रुति० : अनुगृहीतोऽस्मि भवतामाशीर्वचसा। आज्ञापयतु देव।

चाण० : अहं सम्प्रति नद्यां स्नातुं गच्छामि। अद्य पुण्यकालः समागतः। कमण्डलुं वस्त्रञ्चानय।

डँसने के लिए संकेत करो। (इधर-उधर घूमता हुआ) इस समय तो पढ़ाने में भी मन नहीं लगता। सचमुच—

इस पृथ्वी पर सज्जन व्यक्ति भी चिन्ता में निरत होकर प्राण त्यागने के लिए उद्धत देखे जाते हैं, सामान्य लोगों की क्या कथा ॥२॥

(घूमते हुए) इधर तो सभी लोग राजा नन्द के भय से भयभीत दीख पड़ते हैं। इस राज्य का कल्याण कैसे होगा। राज्य के लिए कल्याणकारी नायक अपेक्षित हैं। इस समय मुझे नायक की खोज करनी चाहिए। (नेपथ्य की ओर देखकर) श्रुतिधर! आओ। (इसके बाद शीघ्र ही उनके शिष्य श्रुतिधर का प्रवेश)

श्रुति० : यह श्रुतिधर प्रणाम करता है। (दोनों पैरों को स्पर्श करता है।)

चाण० : आयुष्मान् हो।

श्रुति० : आपके आशीर्वचन से अनुगृहीत हूँ। आज्ञा दें देव!

चाण० : मैं इस समय नदी में स्नान करने जाता हूँ। आज पुण्यकाल आ गया है। कमण्डलु और वस्त्र ले आओ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रुति० : यथाज्ञापयति आचार्यः (इति निष्क्रान्तः)

चाण० : (स्वगतम्) **योगः पुण्यमयः प्राप्तः सर्वसिद्धि प्रदायकः**
पुण्यस्नानञ्च कर्त्तव्यं द्विगुणं कार्यसिद्धये ॥३

(ततः प्रविशति कमण्डलुं वस्त्रञ्च गृहीत्वा श्रुतिधरः)

श्रुति० : श्रीमन् ! इदं कमण्डलुम् इदञ्च वस्त्रम् (इति सः गुरवे समर्पयति)

चाण० : (कमण्डलुं वस्त्रञ्च गृहीत्वा) अस्मिन् पर्णकुटीरे आश्रमे च दृष्टिर्दातव्या।

श्रुति० : यदाज्ञापयति श्रीमन् ! (निष्क्रान्तः)

चाण० : (स्वगतम्) कथं मम दक्षिणाक्षिः स्पन्दते। प्रतीयते अद्य शुभदर्शनं भविष्यति (इतिभ्रमति, नेपथ्ये पुंस्कोकिलानां रवं श्रुत्वा) किं वसन्तः समागतः किमुत वसन्तस्यागमनं भविष्यति अस्मिन् राज्ये ? (विचार्य) समीपे एव प्रवाहयुक्ता गंगा प्रवहति तत्रैव गन्तव्यम् (इति विञ्चित् भ्रमन् निष्क्रान्तः)

श्रुति० : आचार्य की जो आज्ञा (निकल जाता है)

चाण० : (स्वगत) सर्वसिद्धिदायक पुण्यमय योग उपस्थित हो गया है। द्विगुणित कार्यसिद्धि के लिए पुण्यस्नान करना चाहिए ॥३

(इसके बाद कमण्डलु एवं वस्त्र लिए श्रुतिधर का प्रवेश)

श्रुति० : श्रीमन् ! यह कमण्डलु है और यह वस्त्र है। (इस प्रकार वह गुरु को समर्पित करता है।)

चाण० : (कमण्डलु एवं वस्त्र को लेकर) इस पर्ण कुटीर पर तथा आश्रम पर ध्यान रखना।

श्रुति० : श्रीमान् की जो आज्ञा (निकल जाता है।)

चाण० : (स्वगत) क्यों मेरी दायीं आँख फड़क रही है। लगता है आज शुभ दर्शन होगा। (घूमता, है, नेपथ्य में पुंस्कोकिल की आवाज को सुनकर) अये ! क्या वसन्त आ गया या इस राज्य में वसन्त का आगमन होगा ? (विचार कर) निकट ही प्रवाह से युक्त गंगा बहती है, शीघ्र ही चलना चाहिए। (इस प्रकार भ्रमण करता हुआ निकल जाता है।)

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(स्थानम्—नदी तटम्, उच्च भागे पत्रपुष्पाणां मुकुटादिना अलंकृतः तेजस्वी चन्द्रगुप्तः हस्ते काष्ठनिर्मितं खड्गं धृत्वा सम्राट् इवाचरन् तिष्ठन्नास्ते। चतुर्षु दिक्षु गोचारका बालकाः कलितवीर सैनिकवेषाः स्वस्वप्रदेशरक्षण तत्पराः विराजन्ते। मध्ये मध्ये सावधानाः इति ध्वनयः श्रूयन्ते।

(ततः प्रविशति स्नानवेशश्चाणक्यः)

चाण० : (स्वगतम्) अये! इमे बालकाः क्रीडायां संलग्ना विद्यन्ते। रम्या प्रकृतिः रुचिकरेयं क्रीडा। (दिक्षु गम्भीरदृष्टिं दत्वा) सर्वासु दिक्षु सैनिक वेषधारिणो बालकास्तेषां मध्ये च सेनापतयो दृश्यन्ते। सर्वे स्व-स्व कर्मणि संलग्नाः सन्ति। (सावधाना इतिध्वनयो भवन्ति।)
(किञ्चिद् भ्रमन् पुंस्कोकिलानां ध्वनिं श्रुत्वा स्वगतम्) अये! प्रसन्नःकालः। मनस्तु अत्र रमते। (दृष्ट्वा स्वगतम्) अये! एषांमध्ये उच्चासनस्थः एकः बालकः सम्राट् इवा-

---

(स्थान—नदी तट, ऊँचे भाग पर पत्र पुष्प आदि से निर्मित मुकुट से अलंकृत तेजस्वी चन्द्रगुप्त हाथ में काष्ठ निर्मित खड्ग को धारण कर सम्राट् के समान आचरण करता हुआ बैठा है! चारो दिशाओं में गौ चराने वाले बालकगण वीर सैनिक का वेष बनाकर अपने-अपने प्रदेश की रक्षा में तत्पर स्थित हैं। बीच-बीच में 'सावधान' इस प्रकार की ध्वनि सुनाई पड़ती है।

(इसके बाद स्नान वेश में चाणक्य का प्रवेश।)

चाण० : (स्वगत) अये! ये बालकगण क्रीडा में संलग्न हैं। प्रकृति रम्य है। क्रीडा रुचिकर है। (दिशाओं में गंभीर दृष्टि डालकर) सभी दिशाओं में सैनिक वेषधारी बालकगण हैं तथा उनके बीच में सेनापति दीख पड़ते हैं। सभी अपने-अपने कर्म में संलग्न हैं (‘सावधान’ ऐसी ध्वनियाँ होती हैं।) (कुछ घूमते हुए पुंस्कोकिलों की ध्वनि को सुनकर स्वगत) अये! यह समय बड़ा सुहावना है। मन यहाँ प्रसन्न है। (देखकर स्वगत) अये! इन लोगों के बीच में उच्चासन पर बैठा एक बालक सम्राट के समान व्यवहार करता दीख

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चरन् दृश्यते। यावदत्र स्थित्वा इमं बालकौतुकं पश्यामि।
(एकस्मिन् भागे चाणक्यस्तिष्ठति)

राजा : द्वारपाल !

द्वार० : (प्रविश्य) जयतु महाराज ! उपस्थितोऽस्मि !

राजा : दक्षिण दिग् भागस्थं सेनापतिं द्रष्टुमिच्छामि।

द्वार० : यथाज्ञापयति देव ! (इति साञ्जलिः नम्रीभूय किञ्चिदग्रे दक्षिणभागे गत्वा सेनापतिं प्रति) जयतु सेनापतिः।

सेना० : सुखं तेऽस्तु। आगमनप्रयोजनं कथय।

द्वार० : सेनापते ! प्रभुवर्याणामादेशो यत् दक्षिण दिग्भागस्थं सेनापतिं द्रष्टुमिच्छामीति।

सेना० : चलतु ! एष अहमागच्छामि।

द्वार० : (सप्रणामं) यथाज्ञापयति सेनापतिः (इति अग्रे चलति पश्चात् सैनिक गतिभिः सावधानस्थितो सेनापतिः गच्छति)

द्वार० : (राज्ञः समीपमागत्य सेनापतिं प्रति) अत्र सम्राट् विराजते। अत्र गच्छन्तु भवन्तः।

पड़ता है। जबतक यहीं ठहर कर बालकों के इस कौतुक को देखता हूँ। (इस प्रकार एक भाग में चाणक्य ठहर जाता है।)

राजा : द्वारपाल !

द्वार० : (प्रवेश करके) महाराज की जय हो। मैं उपस्थित हूँ।

राजा : दक्षिणदिग्भागस्थ सेनापति को देखना चाहता हूँ।

द्वार० : महाराज की जो आज्ञा। (हाथ जोड़कर नम्र हो कुछ बढ़ कर दक्षिण भाग में जाकर सेनापति के प्रति) सेनापति जी की जय हो।

सेना० : तुझे सुख मिले। अपने आने का प्रयोजन बतलाओ।

द्वार० : सेनापति जी ! प्रभुवर्य का आदेश है कि मैं दक्षिण दिग्भाग के सेनापति को देखना चाहता हूँ।

सेना० : चलो, मैं अभी आता हूँ।

द्वार० : (प्रणाम कर) सेनापति जी की जो आज्ञा। (इस प्रकार वह आगे चलता है पीछे सैनिक गति से सावधान होकर सेनापति चलते हैं।)

द्वार० : (राजा के पास आकर सेनापति के प्रति) यहाँ सम्राट् उपस्थित हैं। आप यहाँ जाएँ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सेना० : (राज्ञः समीपं गत्वा सैनिकरीत्या) विजयतां महाराजः।

राजा : (निकटस्थमासनं संकेतयन्) उपविशतु भवान्।

सेना० : यथादिशति अत्रभवान् (इति आसने तिष्ठति)

राजा : (द्वारपालं प्रति) त्वं स्वनियोगमशून्यं कुरु।

द्वार० : यथाज्ञापयति देवः (इति साञ्जलिः निष्क्रान्तः)

राजा : सेनापते! दक्षिण दिग्भागस्थां सैन्यव्यवस्थां कथयतु।

सेना० : महाराज! भवतामादेशेन दक्षिणभागे सर्वत्र सुव्यवस्था कृता। यथा स्थानं सैन्यदलं दत्तावधानं वर्तते। कुत्रापि सैन्य शैथिल्यं नास्ति। प्रत्यारक्षीकेन्द्रे नियुक्ताः सन्ति सैन्याधिकारिणः। तेषां गतयोऽपिरहस्यचरैः सततमवलोक्यन्ते।

राजा : किं सैन्याधिकारिणः सैनिकाश्च वस्तुतः देशसेवकाः सन्ति किमुत वृत्ति भोगिनः।

सेना० : राजन्! मया अनेकशः परीक्षिताः। ते वस्तुतः सत्यनिष्ठाः देशसेवकाः सन्ति :

सेना० : (राजा के पास जाकर सैनिक रीति से) महाराज की जय हो।

राजा : (निकटस्थ आसन का संकेत कर) आप बैठें।

सेना० : श्रीमान् का जो आदेश (आसन पर बैठ जाता है)

राजा : (द्वारपाल के प्रति) तुम अपने कार्य पर जाओ।

द्वार० : महाराज की जो आज्ञा (इस प्रकार अञ्जलि बाँधे निकल जाता है।

राजा : सेनापति, दक्षिण दिशा की सैनिक व्यवस्था बतलाएँ।

सेना० : महाराज! आपके आदेश से दक्षिण भाग में सर्वत्र अच्छी व्यवस्था की गयी है। यथास्थान सैन्यदल पूर्ण रूप में सावधान है। कहीं भी सैनिक शिथिलता नहीं है प्रत्येक आरक्षी केन्द्र में सैनिक अधिकारी नियुक्त हैं। उनकी गति विधियाँ भी गुप्तचरों के द्वारा सतत निरीक्षित होती रहती हैं।

राजा : सैनिक अधिकारीगण एवं सैनिक वस्तुतः देशसेवक हैं या मात्र वृत्तिभोगी ?

सेना० : राजन्! मैंने अनेक बार परीक्षा ली है। वे सभी सैनिक सत्यनिष्ठ देश सेवक हैं।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तत्र तु—

वृत्तिः राज्यहितार्थमत्र विहिता तेषां भटानां सदा
राज्यस्यास्य वलस्य वर्धनमहो संजायते नित्यशः।
उत्साहेन समन्विताश्च सकलाः सिंहोपमा रक्षकाः
प्राणाः यान्तु वरं यशांसि नहि नो गर्जन्ति मे सैनिकाः ॥४

राजा : अतीव सुन्दरम्। अग्रे कथ्यताम्?

सेना० : महाराज! प्रशिक्षिता एव सैनिकाः सर्वत्र नियुक्ताः सन्ति। त एव सीमा रक्षणे तत्पराः सन्ति। अप्रशिक्षितानां कृते प्रशिक्षणकार्यमपि अन्यत्र प्रशिक्षणशिविरे संचाल्यते।

राजा : दक्षिण भागे शत्रुनिरोधार्थं किं भवता कृतम्?

सेना० : परिपन्थिनः कथमपि दक्षिणभागात् सीमोल्लंघनं न करिष्यन्ति। कुतः —

भटाः प्रतिभटास्तत्र शिक्षिताः शस्त्रचालने
गतागतञ्च कुर्वन्तः विद्यन्ते किल सर्वदा ॥५

राजा : अतीव शोभनम्। तथापि सैन्याभिवृद्धये सततं यतनीयम्। अन्ये सैनिका अपि तथा प्रशिक्षणीया येन यथा समयं देश-

---

वहाँ तो—उन वीरों की वृत्ति राज्यहित के लिए ही विहित है। इस राज्य की सैन्यशक्ति निरन्तर बढ़ रही है। उत्साह से समन्वित सिंह सदृश मेरे सभी वीर 'प्राण जाना ठीक है लेकिन यश नहीं' 'इस प्रकार का गर्जन करते हैं ॥४

राजा : बहुत सुन्दर। आगे कहिए।

सेना० : महाराज! सभी जगह प्रशिक्षित सैनिक नियुक्त हैं, वे लोग ही सीमा रक्षण में तत्पर हैं। अप्रशिक्षितों के लिए प्रशिक्षण का कार्य अन्यत्र प्रशिक्षण शिविर में चल रहा है।

राजा : दक्षिण भाग में शत्रुओं को रोकने के लिए आपने क्या किया है?

सेना० : शत्रु कभी भी दक्षिण भाग से सीमोल्लंघन नहीं कर सकते, क्योंकि वीर सैनिक एवं प्रति सैनिक (उपसैनिक) शस्त्र संचालन में पूर्ण प्रशिक्षित सदा ही गस्ती लगाया करते हैं ॥५

राजा : बहुत ही सुन्दर। फिर भी सैनिक अभिवृद्धि के लिए निरन्तर प्रयत्नशील रहना है। अन्य सैनिकों को भी इस प्रकार का प्रशिक्षण दें जो लोग समयानुसार देश की रक्षा में पूर्ण योग

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रक्षायां योगं दास्यन्ति। गम्यतां स्वकार्यं सिद्धये इति।

सेना० : यथाज्ञापयति महाराजः (इति सैनिक रीत्या प्रणमन् निष्क्रान्तः)

चाण० : (स्वगतम्) अयं राजा शासने दक्षोऽस्ति। अनेन सेनापतिना यत् कथितं तत्तु आदर्शभूतमेव तथापि सम्भावनमभिलक्ष्य पुनरपि सैनिकेषु प्रशिक्षणार्थं वलम् अस्य भविष्णुतां द्योतयति। वस्तुतः अतीव रुचिकरेयं क्रीडा।

राजा : (स्वगतम्) दक्षिण दिशायां सैनिकव्यवस्था दृढा अस्ति, पूर्वदिशायामपि तादृशी कार्या (विचार्य प्रकाशम्) द्वारपाल! आगम्यताम्।

द्वार० : (प्रविश्य) जयतु महाराजः (इति साञ्जलिः प्रणमन्) किमाज्ञापयति महाराजः?

राजा : सम्प्रति पूर्वभागस्थं सेनापतिं द्रष्टुमिच्छामि।

द्वार० : यथाज्ञापयति महाराजः। (इति साञ्जलिः प्रणम्य पूर्वभागस्थं सेनापतिं प्रतिगत्वा) जयतु सेनापतिः।

सेना० : सुखं तेऽस्तु। आगमनप्रयोजनं कथय?

दे सकें। आप अब अपने प्रयोजन सिद्धि के लिए जाएँ।

सेना० : महाराज की जो आज्ञा (इस प्रकार सैनिक रीति से प्रणाम करता हुआ निकल जाता है।)

चाण० : (स्वगत) यह राजा शासन में दक्ष है। इस सेनापति ने जो कहा वह तो आदर्श था फिर सम्भावना को लक्ष कर सैनिकों में प्रशिक्षण पर बल देना इसकी भविष्णुता को सूचित करता है। वस्तुतः यह क्रीडा बहुत रुचिकर है।

राजा : (स्वगत) दक्षिण दिशा की सैनिक व्यवस्था सुदृढ़ है। पूर्व दिशा में भी वैसी ही व्यवस्था होनी चाहिए (विचार कर) द्वारपाल आओ।

द्वार० : (प्रवेश कर) महाराज की जय हो (इस प्रकार अञ्जलि बाँधे प्रणाम करता हुआ) महाराज की क्या आज्ञा है।

राजा : इस समय मैं पूर्व भागस्थ सेनापति को देखना चाहता हूँ।

द्वार० : महाराज की जो आज्ञा। (हाथ जोड़े प्रणामकर पूर्व भागस्थ सेनापति के निकट जाकर) सेनापति जी की जय हो।

सेना० : तुझे सुख मिले। आने का प्रयोजन कहो।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

द्वार० : प्रभुवर्याः भवन्तं द्रष्टुमिच्छन्तीति ।

सेना० : चलतु अहमपि आगच्छामि (अग्रे द्वारपालः ततः सेनापतिः सैनिकगत्या चलतः)

द्वार० : (राज्ञः निकटं गत्वा) अत्रभवन्तः प्रभुवर्याः विराजन्ते, गच्छन्तु भवन्तः ।

सेना० : विजयतां महाराजः ।

राजा : स्वागतम् । आसनं गृह्यताम् (इतिनिकटस्थमासनं संकेतयति सेनापतिश्च तत्रोपविशति (द्वारपालं प्रति) त्वं स्वनियोगमशून्यं कुरु !

द्वार० : यथाज्ञापयति देवः (इति साञ्जलिः प्रणम्य निष्क्रान्तः)

राजा : सेनापते ! पूर्व दिशायाः सैनिकव्यवस्थां प्रकाशयतु ?

सेना० : महाराज ! सर्वं सुव्यवस्थितम् । यथास्थाने सैनिकाः स्वकर्मणि संलग्नाः सन्ति । दलेषु विभक्ताः सैनिकाः पदाधिकारीणामादेशमनुपालयन्ते तथा ते सततं देशसेवायां संलग्नाः विद्यन्ते । देशं प्रति तेषां भक्तिः नितरां दृढ़ा विद्यते । कुत्रापि अशान्ति-

---

द्वार० : महाराज आपको देखना चाहते हैं ।

सेना० : चलो मैं भी आता हूँ । (आगे द्वारपाल तथा तत्पश्चात् सैनिक गति से सेनापति चलते हैं ।)

द्वार० : (राजा के पास जाकर) महाराज यहाँ हैं । आप यहाँ जाएँ ।

सेना० : महाराज की जय हो ।

राजा : आपका स्वागत है । आसन ग्रहण करें । (इस प्रकार निकट के आसन का संकेत करता है सेनापति उस पर बैठते हैं । (द्वारपाल के प्रति) तुम अपने काम पर जाओ ।

द्वार० : महाराज की जो आज्ञा (अञ्जलि बाँधे प्रणाम कर निकल जाता है ।)

राजा : सेनापति, पूर्व दिशा की सैनिक व्यवस्था पर प्रकाश डालें ।

सेना० : महाराज ! सभी सुव्यवस्थित है । यथा स्थान सैनिक अपने-अपने कार्य में संलग्न हैं । दलों में विभाजित सैनिकगण पदाधिकारियों के आदेश का अनुपालन करते हैं तथा वे निरन्तर देश सेवा में संलग्न हैं । देश के प्रति उनकी भक्ति काफी दृढ़ है । कहीं अशान्ति नहीं है । अधिक क्या कहें,

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

र्नास्ति। किमधिकं पूर्वभागात् परिपन्थिनां पक्षिणोऽपि अत्र न आगमिष्यन्ति किमुत परिपन्थिनः।

राजा : सुन्दरम्, एतादृशी एव व्यवस्था विधेया। कथ न एतादृशी व्यवस्था भविष्यति, भवन्तस्तु सुयोग्याः पूर्णशिक्षिताः पर्वतसन्निभाः दृढ़ाः सन्ति। तथापि राष्ट्रभावस्य सञ्चारः सैनिकानां हृदि सततं कार्यः यतो हि राष्ट्रभावाभिभूताः सैनिकाः स्वप्राणानगणयन्तो राष्ट्रसेवां साफल्येन करिष्यन्ति। गम्यतामर्थसिद्धये।

सेना० : यथाज्ञापयति महाराजः (इति सैनिक रीत्या प्रणमन् निष्क्रान्तः)

चाण० : (स्वगतम्) अयमतीव कुशलो व्यवस्थापकः। एतादृशः बालकः एव अस्य राष्ट्रस्य शासको भवितुमर्हति। भविष्णुः बाल्यादेव प्रकटयति स्वकीयं वैशिष्ट्यम्। यथा वर्धिष्णवः पादपाः कोमलानि किसलयानि प्रकटयन्ति तथैवाऽयं बालकः वर्धिष्णुः स्वबाल्ये एव क्रीडायामेतादृशीं व्यवस्थां सम्पादयति

पूर्व भाग से शत्रुओं के पक्षी भी नहीं आयेंगे शत्रुओं की तो बात ही क्या।

राजा : बहुत सुन्दर। इसी प्रकार की व्यवस्था होनी चाहिए, क्यों नहीं इस प्रकार की व्यवस्था होगी। आप लोग तो सुयोग्य, पूर्ण शिक्षित एवं पर्वत सदृश दृढ़ हैं। फिर भी सैनिकों के हृदय में राष्ट्रभाव का सञ्चार निरन्तर करना चाहिए जिससे राष्ट्रभाव से समन्वित सैनिकगण अपने प्राणों की भी परवाह नहीं करते हुए राष्ट्र की सेवा सफलतापूर्वक करेंगे। आप अपने प्रयोजन की सिद्धि में जाएँ।

सेना० : महाराज की जो आज्ञा (सैनिक रीति से प्रणाम करता हुआ निकल जाता है।)

चाण० : (स्वगत) यह बहुत ही कुशल व्यवस्थापक है। इस प्रकार का बालक ही राष्ट्र का शासक हो सकता है। भविष्णु बालकपन से ही अपना वैशिष्ट्य प्रकट करता है। जैसे वर्धिष्णु वृक्ष कोमल किसलयों को प्रकट करते हैं उसी प्रकार यह वर्धिष्णु बालक अपने बालकपन में ही क्रीडा में इस प्रकार की व्यवस्था का सम्पादन करता है, सैनिकों को

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सम्पादयितुञ्च प्रेरयति सैनिकान् सम्बोधयति। तथापि पुनः परीक्ष्याम्यहं यदस्यां शासकबुद्धिः प्रचुरा विद्यते नवेति। (राज्ञः समीपं गत्वा) जयतु महाराजः।

राजा : ब्राह्मणदेव ! अभिवादये।

चाण० : वर्धतां भवान् इति दक्षिण हस्तं उत्थापयति।

राजा : इदं तृणासनं शुद्धासनञ्च। अलंकरोत्विदमासनम्।

चाण० : यथाज्ञापयति महाराजः (इति आसने उपविशति)

राजा : ब्राह्मणदेव ! स्वकीयमागमन प्रयोजनं प्रकाशयतु।

चाण० : महाराज ! भवान् तु राजा, अहमस्मि ब्राह्मणः। ब्राह्मणानां काऽधिकाभिलाषा। यतः—

गोदुग्धैर्हविषा सदा बुधवराः कुर्वन्ति देवार्चनं
ये चाश्नन्ति सदैव सत्वबलदं दुग्धं मधु ब्राह्मणाः
सत्याचार विचारचारुचतुराः सत्वस्य संरक्षकाः
नेच्छन्तीह धनं च राज्यमतुलं वाञ्छन्ति गांकेवलम् ॥६

अतः महाराज ! भवन्तं गां याचे।

सम्बोधित करता है। फिर भी मैं पुनः इसकी परीक्षा लेता हूँ कि इसमें शासक बुद्धि प्रचुर है या नहीं। (राजा के समीप जाकर) महाराज की जय हो।

राजा : ब्राह्मणदेव ! मैं आपका अभिवादन करता हूँ।

चाण० : आपकी वृद्धि हो (अपना दाहिना हाथ उठाता है।)

राजा : यह तृणासन एवं शुद्धासन है। आप इसे अलंकृत करें।

चाण० : महाराज की जो आज्ञा (आसन पर बैठ जाता है)

राजा : ब्राह्मणदेव ! आप अपने आगमन का प्रयोजन बतलावें।

चाण० : महाराज आप तो राजा हैं और मैं ब्राह्मण हूँ। ब्राह्मणों की अभिलाषा ही क्या। क्योंकि गाय के दूध एवं हविष से जो सदा देवार्चन करते हैं तथा जो सदा सत्व बल देने वाले दुग्ध एवं मधु का भोजन करते हैं। सत्य आचार एवं विचार में चतुर, सत्व के संरक्षक न तो अतुल धन चाहते हैं, न राज्य केवल गाय की कामना करते हैं ॥६

अतः महाराज ! मैं आप से गाय की याचना करता हूँ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

राजा : (सहर्षम्) इतः चरन्तीषु गोषु स्वेच्छया एकां गां गृह्णातु भवान्।

चाण० : महाराज ! यस्य इमाः गावः सन्ति स यदि प्रतिरुध्येत।

राजा : (सगर्वम्) आः कः मयिशासितरि गां दातुं प्रतिरुन्ध्यात्।

आज्ञां यो नहि शासकस्य मनुते सो राष्ट्रद्रोही सदा
दण्ड्यस्तत्समयेऽपराधविधिना कल्याणहेतोः ध्रुवम्।
राज्यस्याभ्युदयार्थिना सुकृतिना राज्यासनस्थेन वै
राज्यं याति रसातलं यदि क्वचित् शैथिल्यमादर्शितम् ॥७

चाण० : (स्वगतम्) क्रीडायामपि राजीयति। सत्यम्।

पादपस्यैधमानस्य पत्रं स्फुटति सुन्दरम्
शासकस्य गुणः बाल्ये बालक्रीडासु दृश्यते ॥८

(प्रकाशम्) राजन्! सर्वं लब्धम्। ब्राह्मणाः दातुर्भाविनैव सन्तुष्टाः भवन्ति। यतः—

न राज्येन न वित्तेन न वा सौख्यस्य साधनैः
विप्रः भवति सन्तुष्टो दातुः भावेन केवलम ॥९

राजा : (हर्ष के साथ) चरती हुई गायों में एक गाय आप स्वेच्छा से ले लें।

चाण० : महाराज ! जिसकी ये गायें हैं वह यदि मुझे रोके।

राजा : (गर्व के साथ) आः ! कौन मेरे शासन में रहते गाय देने से रोके ! जो शासक की आज्ञा नहीं मानता वह सदा राष्ट्र-द्रोही है। निश्चय ही राज्य के कल्याण के लिए राज्य का अभ्युदय चाहने वाला यशस्वी राज्य सिंहासनस्थ के द्वारा उसे अपराध विधि के अनुसार दण्डित करना चाहिए। यदि किसी ने शैथिल्य दिखलाया तो राज्य रसातल में चला जाता है ॥७

चाण० : (स्वगतं) क्रीडा में भी राजा के समान व्यवहार करता है। सचमुच—

बढ़ने वाले वृक्ष के पत्र भी सुन्दर ही निकलते हैं। बालकपन में ही बाल्य क्रीडा में शासक का गुण दीख पड़ता है ॥८

(प्रकाश) राजन्! मैंने सब कुछ पा लिया। ब्राह्मण तो दाता के भाव से ही सन्तुष्ट हो जाते हैं। क्योंकि न तो राज्य से न धन से और न सुख के विविध साधनों से ब्राह्मण सन्तुष्ट होते हैं। वे केवल दाता के भाव से ही सन्तुष्ट होते हैं।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विजयतां देव ! राजकार्ये व्यवधानो मा भवतु अतः गच्छामि (निष्क्रान्तः)

राजा : (स्वगतम्) ब्राह्मणस्याशीर्वचसा अवश्यं कल्याणं भविष्यति। अनेन ब्राह्मणेनाहं प्रथमं राजारूपेण सम्मानितः। वस्तुतः मयानुभूत राज्यासनगौरवम्। परं योग्या एव राज्यासनमधिगन्तुं समर्था भवन्ति। ये खलु विविधासु विद्यासु कुशला न भवन्ति विशेषतो राजनीतिविद्यासु नीतिविद्यासु च ते तु राज्यशासनेऽपि साफल्यं नाधिगच्छन्ति। अतः अद्यारभ्य मया अध्ययनीयम्। साम्प्रतमहं गुरोर्गृहं गच्छामि। क्रीडा यथार्थतामेतीति यतनीयम्। (प्रकाशम्) अद्य क्रीडा समाप्ता भवति (सर्वे निष्क्रान्ताः)

(चाणक्यः स्वकुट्यामुच्चासने तिष्ठन् अध्यापयति। छात्राः कुशासने तिष्ठन्तः पठन्ति। ततः प्रविशति चन्द्रगुप्तः)

देव की विजय हो। राजकार्य में व्यवधान न हो अतः जाता हूँ। (ऐसा कहकर निकल जाते हैं।)

राजा : (स्वगत) ब्राह्मण के आशीर्वाद से अवश्य कल्याण होगा। इस ब्राह्मण के द्वारा मैं प्रथम राजा के रूप में सम्मानित हुआ हूँ। वस्तुतः मैंने राज्यासन के गौरव का अनुभव किया। लेकिन योग्य ही राज्यासन को प्राप्त करने में समर्थ हो सकते हैं जो विविध विद्याओं में कुशल नहीं होते, विशेषकर राजनीति एवं नीति विद्या में वे तो राज्य शासन में भी सफल नहीं हो सकते। इसलिए आज से मुझे पढ़ना चाहिए। इस समय मैं गुरु के घर चलता हूँ। क्रीडा यथार्थ में परिणत हो जाय इस प्रकार का यत्न करना चाहिए। (प्रकाश) आज खेल समाप्त होता है (सभी निकल जाते हैं।)

(चाणक्य अपनी कुटी में उच्चासन पर बैठा पढ़ा रहा है। छात्रगण कुशासन पर बैठे पढ़ रहे हैं। इसके बाद चन्द्रगुप्त का प्रवेश)

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चन्द्र० : मुरायाः पुत्रोऽहं चन्द्रगुप्तः अभिवादये (इति साञ्जलिः प्रणमति)

चाण० : (दृष्ट्वा, स्वगतम्) अये स एव दृष्टबालः सम्प्रति विद्यते। प्रतीयते यदध्ययनस्याभिलाषा अस्य हृदि प्रादुर्भूता। अस्त्ययं तेजस्वी निर्भीकवक्ता।

(प्रकाशम्) आयुष्मानेधि चन्द्रगुप्त। आगच्छ। अत्र कुशासने उपविश।

चन्द्र० : यदाज्ञापयति श्रीमन् (कुशास्तरणे उपविश्य स्वगतम्) अयं स एव यो मां राजारूपेण सम्मानितवान्। (प्रकाशं) गुरुदेव! मे पिपठिषा अस्ति। भवतां कृपामधिगन्तुमिच्छामि।

चाण० : (स्वगतम्) अयमस्य राष्ट्रस्य भावी शासकः, एनं शास्त्रनिपुणं करिष्यामि। (प्रकाशम्) अद्यैव शुभ मुहूर्तोऽस्ति उपनयनस्य। (अन्यान् छात्रान् सम्बोध्य) युष्माभिः अस्यकृते उपनयन व्यवस्था कार्या। अयं वत्सः स्नात्वा शीघ्रमागच्छतु (चन्द्रगुप्तं प्रति) त्वं पुण्यवत्यां भागीरथ्यां स्नातुं गच्छ।

चन्द्र० : मुरा का पुत्र मैं चन्द्रगुप्त आपका अभिवादन करता हूँ। (इस प्रकार हाथ जोड़कर प्रणाम करता है।)

चाण० : (देखकर, स्वगत) यह वही पूर्व देखा बालक लग रहा है। लगता है अध्ययन की अभिलाषा इसके हृदय में प्रादुर्भूत हो गयी। यह तेजस्वी एवं निर्भीक वक्ता है।

(प्रकाश) दीर्घायु हो चन्द्रगुप्त। आओ। कुशास्तरण पर बैठो।

चन्द्र० : श्रीमान् की जो आज्ञा (कुशास्तरण पर बैठकर स्वगत) ये वे ही हैं जिन्होंने मुझे राजा के रूप में सम्मानित किया था (प्रकाश) गुरुदेव! मुझे पढ़ने की उत्कट अभिलाषा है। आपकी कृपा प्राप्त करना चाहता हूँ।

चाण० : (स्वगत) यह इस राष्ट्र का भावी शासक है, इसे शास्त्र निपुण बनाऊँगा। (प्रकाश) आज ही उपनयन का शुभ मुहूर्त है। (दूसरे छात्रों को सम्बोधित कर) आप लोग इसके लिए उपनयन की सारी व्यवस्था करें। यह वत्स शीघ्र ही स्नान कर आता है। (चन्द्रगुप्त के प्रति) तुम पुण्यवती भागीरथी में स्नान के लिए जाओ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चन्द्र० : यदाज्ञापयति श्रीमन् (इति निष्क्रान्तः) (अन्ये छात्राः उपनयनव्यवस्थायां संलग्ना भवन्ति ।)

एकश्छात्रः : उपनयन व्यवस्था विहिता । अतः परं किं करणीयम् ?

चाण० : पुष्पमालिका तीर्थजलञ्च विद्यते ?

छात्रः : आम् श्रीमन् ।

चाण० : तर्हि सर्वे मंगलपाठमारभन्तु । सम्प्रति स्नात्वा आगच्छत्येव चन्द्रगुप्तः ।

सर्वे छात्राः : "पुनन्तु मा देवजनाः पुनन्तु मनसा धियः
पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा ॥१०*

(इति सस्वरमन्त्र पाठं कुर्वन्ति । ततः प्रविशति स्नातश्चन्द्रगुप्तः)

चन्द्र० : (मृगचर्मासीनस्य गुरोः पादौ स्पृशति) अभिवादये

चाण० : आयुष्मानेधि । मेधां ते वर्धयन्तु यज्ञदेवताः । वत्स ! अत्र कुशास्तरणे पूर्वाभिमुखस्त्वं तिष्ठ ।

* शु० य० वे० १९/३९

चन्द्र० : श्रीमान् का जो आदेश (निकल जाता है । दूसरे छात्र उपनयन की व्यवस्था में संलग्न हो जाते हैं ।)

एक छात्र : उपनयन की सारी व्यवस्था हो गयी । अब क्या करना है ?

चाण० : पुष्पमाला एवं तीर्थजल है ?

छात्र : हाँ श्रीमन् ।

चाण० : तब तो सभी मंगल पाठ आरम्भ करें । इस समय चन्द्रगुप्त स्नान कर आता ही होगा ।

सभी छात्र : देवजन मुझे पवित्र करें । मन के साथ बुद्धि एवं कर्म मुझे पवित्र करें सभी भूतजात प्राणी मुझे पवित्र करें हे अग्नि तुम भी मुझे पवित्र करो ॥१०

(इस प्रकार सभी सस्वर मन्त्र का पाठ करते हैं । स्नान किए चन्द्रगुप्त का प्रवेश)

चन्द्र० : (मृगचर्म पर बैठे गुरु के पैरों का स्पर्श करता है) अभिवादन करता हूँ ।

चाण० : आयुष्मान् हो । यज्ञ देवता तुम्हारी मेधाशक्ति को बढ़ावें । वत्स ! इस कुशास्तरण पर पूर्वाभिमुख बैठ जाओ ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चन्द्र० : यथाज्ञापयति गुरुदेव ! (इति कुशास्तरणे पूर्वाभिमुखस्तिष्ठति)

चाण० : (चन्दनं गृहीत्वा) **चन्दनं परमं दिव्यं शीतलं चन्द्रसन्निभम्**
आपदामपहर्त्तारं पवित्रं वन्द्यतेऽनया ।।११
(इति चन्दनं ददाति, प्रकाशम्) सम्प्रति चलतु यज्ञभूमौ ।

चन्द्र० : यथाज्ञापयति श्रीमन् (अग्रे गुरुः तदनु चन्द्रगुप्तः ततः उपनयन सामग्रीं गृहीत्वा शिष्याश्च निष्क्रान्ताः। नेपथ्ये)

*** यज्ञेन यज्ञमयजन्तदेवास्तानि धर्माणि प्रथमान्यासन्**
तेहनाकंमहिमानः सचन्तयत्र पूर्वे साध्याः सन्ति देवाः ।।१२
(ततः प्रविशति पुष्पावचयं नाटयन् एको ब्रह्मचारी)

ब्रह्म० : (पुष्पाणि पुटके गृहीत्वा स्वगतम्) प्रभूतानि पुष्पाणि अवचितानिमया ।
(ततः प्रविशति द्वितीयो ब्रह्मचारी)

* शु० य० वे० ३१/१६

चन्द्र० : गुरुदेव की जो आज्ञा (इस प्रकार कुशास्तरण पर पूर्वाभिमुख बैठ जाता है)

चाण० : (चन्दन लेकर) पवित्र चन्द्रमा के समान शीतल परम दिव्य आपत्तियों को हरण करने वाला यह चन्दन इसके द्वारा अभिवन्दित होता है ।।११
(इस प्रकार चन्दन लगाते हैं प्रकाश) इस समय यज्ञभूमि में चलो ।

चन्द्र० : श्रीमान् की जो आज्ञा (आगे आगे गुरु इसके बाद चन्द्रगुप्त तथा उपनयन सामग्री को लेकर शिष्य लोग निकल जाते हैं !). नेपथ्य में—
(देवताओं ने साधनभूत यज्ञ से साध्यभूत यज्ञ का यजन किया । वे ही प्रथम धर्म थे । उन महत्वशाली देवताओं ने स्वर्ग प्राप्त किया जहाँ प्रजापति आदि देवता पूर्व से विद्यमान हैं ।) ।१२
(इसके बाद पुष्पचयन का अभिनय करते हुए एक ब्रह्मचारी का प्रवेश)

ब्रह्म० : (पुष्पों को दोने में रखकर स्वगत) मैंने काफी फूल चुन लिया ।
(इसके बाद द्वितीय ब्रह्मचारी का प्रवेश)

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रुतिधरः : धर्मंधर ! किमर्थं प्रभूतानि पुष्पाणि अवचितानि ?

धर्म० : मित्र ! किं त्वया न ज्ञायते यदद्य चन्द्रगुप्तस्य दीक्षा दिवसः ।

श्रुति० : श्रुतं तु स अतीव तेजस्वी । अल्पेनैव कालेन सर्वविद्या अधिगता ।

धर्म० : गुरुरपि एतादृशः अहर्निशं प्रयत्नेन विद्यां प्रयच्छति कुतः—

सूक्ष्मेक्षणयुते शिष्ये विनयावनते तरौ
गुरुणाप्रसारिता विद्या वल्लरीवाधिरोहति ॥१३

श्रुति० : सत्यं मित्र !

विद्यादानात् गुरुः श्लाध्यः शिष्यस्तद् ग्रहणात्तथा
शिष्याणां गुरुणा वृद्धिः गुरोः शिष्यैः सतां मतम् ॥१४

धर्म० : मित्र ! किमधिकं चन्द्रगुप्तस्तु चन्द्रकलेव प्रतिदिनं वृद्धिमाप्तवान् ।

श्रुति० : सत्यम् —

नाम्ना सम्बोध्यते व्यक्तिः तेन सार्थकतां गतः
नाम्नः सार्थकता येन स सदैव विशिष्यते ॥१५

श्रुति० : धर्मंधर ! तुमने किसलिए इतने अधिक पुष्पों का चयन किया ?

धर्म० : मित्र क्या तुम नहीं जानते कि आज चन्द्रगुप्त का दीक्षा दिवस है ।

श्रुति० : सुना तो है—वह बहुत तेजस्वी है । उसने अल्प काल में ही सारी विद्या पढ़ ली ।

धर्म० : गुरुजी भी इसी प्रकार के हैं कि दिन रात परिश्रम से विद्या दान करते हैं । क्योंकि– विनय से अवनत तथा सूक्ष्मेक्षण युक्त शिष्य में गुरु के द्वारा प्रदत्त विद्या अवनत वृक्षपर वल्लरी के समान फैल जाती है ॥१३

श्रुति० : सचमुच मित्र ! विद्यादान से गुरु प्रशंसनीय होते हैं तथा विद्या ग्रहण से शिष्य प्रशंसनीय होता है, इस प्रकार गुरु से शिष्यों की वृद्धि तथा शिष्यों से गुरु की वृद्धि होती है ऐसा सज्जनों का मत है ॥१४

धर्म० : मित्र ! अधिक क्या कहें चन्द्रगुप्त ने तो चन्द्रकला के समान प्रतिदिन वृद्धि प्राप्त की ।

श्रुति० : सचमुच नाम से सार्थकता को प्राप्त व्यक्ति उसी से सम्बोधित होता है, जिससे नाम की सार्थकता हो वही सदा विशिष्ट होता है ॥१५

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

धर्म० : तर्हि चलावः मित्र ! शीघ्रमेव कार्यं सम्पादनीयमस्ति (इति उभौभ्रमतः)

श्रुति० : (धर्मवसोः हस्ते एकमौषधं दृष्ट्वा) वयस्य ! इदमौषधं किन्नामधेयं यत् त्वया नीतम् ।

धर्म० : सम्राट् करणमौषधमिदम् ।

श्रुति० : किं दीक्षाकाले अस्यानिवार्यता विद्यते ?

धर्म० : गुरुणा आदिष्टोऽस्मि यत् इदमौषधमवश्यमेवानेतव्यम् ।

श्रुति० : वयस्य ! किमयम् अस्य राज्यस्य भावी सम्राट् ?

धर्म० : गुरुणा प्रकाशितं यत्—इयं पृथिवी वीरभोग्या । चन्द्रगुप्तः चक्रवर्ती लक्षण समन्वितः सर्वथा अस्य राज्यस्य कृते उपयुक्तः ।

श्रुति० : सत्यम्, प्रकाशमयस्य दिवसस्य प्रभातमपि प्रकाशमयं भवति । शुभमुहूर्तस्येयं वेला आवांचलावः (इति पटाक्षेपः)

(नायकान्वेषणं तस्य शिक्षणञ्च नाम तृतीयोऽङ्कः समाप्तः)

धर्म० : तब तो मित्र ! चलें शीघ्र ही कार्य सम्पादन करना है । (दोनों घूमते हैं ।)

श्रुति० : (धर्मवसु के हाथ में एक औषधि को देखकर) मित्र ! इस औषधि का क्या नाम है जिसे तुम ले जा रहे हो ।

धर्म० : यह सम्राट्करण औषधि है ।

श्रुति० : क्या दीक्षा काल में इसकी अनिवार्यता है ?

धर्म० : गुरुजी ने आदेश दिया है कि यह औषधि अवश्य लाना

श्रुति० : मित्र ! क्या यह राज्य का भावी सम्राट् है ?

धर्म० : गुरुजी ने कहा था कि—यह पृथिवी वीरभोग्या है । चन्द्रगुप्त चक्रवर्ती लक्षण से युक्त है वह इस राज्य के लिए सर्वथा उपयुक्त है ।

श्रुति० : सचमुच, प्रकाशमय दिन का प्रभात भी प्रकाशमय होता है । शुभ मुहूर्त की यह वेला है हम दोनों चलें ।

(पटाक्षेपः)

(नायकान्वेषण तथा शिक्षण नामक तृतीय अंक समाप्त)

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चतुर्थोऽङ्कः

(ततः प्रविशति ससंभ्रमः एकः भृत्यः)

भृत्यः : (स्वगतम्) अये ! अत्रापि धर्मदासो न विद्यते। अन्वेषयामि तावत् (इतस्ततः भ्रमन् दृष्ट्वा) धर्मदासस्तु इतः एकान्ते ध्यानमग्नस्तिष्ठति। यावत् समीपं गच्छामि। (सन्निकटं गत्वा उच्चस्वरेण) अये मित्रधर्मदास! कथमिह एकान्ते तिष्ठसि ?

धर्मदासः : (द्रष्टुमभिनयं कृत्वा) अहा! मित्रकर्मदास! आगच्छ। राजभवनकोलाहलाद दूरं स्थित्वा स्वात्मानं स्थिरीकर्तुमिहागतोऽस्मि। कथय राजभवने किमपि कार्यमस्ति ?

कर्मदासः : धर्माधर्ममविचारयन् कार्ये एव सर्वदा व्यापृतो भवामि। राजभवने तु कार्यस्यभावः कदापि न विद्यते। वयं तु कर्मकराः अहर्निशं सेवामहे। कथय त्वमेकान्ते किं चिन्तयसि ?

धर्म० : किं चिन्तयामि। राजा रात्रौ निद्राविहीनः चिन्तामग्नः रात्रिपर्यन्तं पार्श्वपरिवर्तनं कृतवान्। तस्य सविधे अहमपि तथैव स्थितः आसम्।

(घबराये हुए एक भृत्य का प्रवेश)

भृत्य : (स्वगत) अये! यहाँ भी धर्मदास नहीं है। तबतक उसे खोजता हूँ (इधर उधर घूमता हुआ देखकर) धर्मदास तो इधर एकान्त में ध्यानमग्न बैठा है। जबतक इसके समीप चलता हूँ (सन्निकट जाकर उच्च स्वर में) अये मित्र धर्मदास! यहां एकान्त में क्यों बैठे हो ?

धर्मदास : (देखने का अभिनय करके) अहा मित्र कर्मदास! आओ। राजभवन के कोलाहल से दूर अपनी आत्मा को स्थिर करने यहाँ आ गया हूँ। कहो राजभवन में कुछ कार्य है क्या ?

कर्म० : धर्माधर्म का बिना विचार किए सदा कार्य में ही लगा रहता हूँ। राजभवन में तो कभी कार्य का अभाव रहता भी नहीं। हमलोग तो कर्मकर हैं, दिन रात सेवा करते हैं। कहो तुम एकान्त में क्या सोचते हो ?

धर्म० : क्या सोचता हूँ राजा निद्राविहीन चिन्ता में डूबा हुआ रात भर पार्श्व परिवर्तन करता रहा। उनके निकट मैं भी वैसे ही बैठा था।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कर्म० : सम्प्रति कथं त्वमिहागतोऽसि ।

धर्म० : प्रभाते सौन्दर्यसन्धानया कयापि सह वार्तयतिस्म राजा अतः अवकाशं लब्ध्वा क्षणमत्र मनोविनोदयन् तिष्ठामि ।

कर्म० : मित्र ! कथं राजा रात्रौ निद्रां न लब्धवान् ?

धर्म० : राज्ञः आकृत्या प्रतीयते यत् स साम्प्रतं भतभीतस्तिष्ठति ।

कर्म० : राज्ञे भयम्, भयस्य किं कारणमस्ति ?

धर्म० : तस्य मनसि सर्वदैव सूर्यास्तस्य भयं वरीवर्ति ।

कर्म० : कथं सूर्यास्तस्य भयम् ?

धर्म० : मित्र ! यदाबद्धपिञ्जरतः अनावृतेऽपि द्वारे विशालकायः सिंहः चन्द्रगुप्तेन वहिः कृतः तदाप्रभृति तस्य बुद्धिमतां वीक्ष्य राज्ञः मनसि चन्द्रोदयस्य संभावनं जातम् । किं त्वं न जानासि ? अस्मिन् राज्ये चन्द्रोदयस्य संभावनं विद्यते । पुनः चन्द्रोदयस्तु तदैव शोभते यदा सूर्यास्तो भवति ।

कर्म० : चन्द्रगुप्तः असहायः कथं तस्योदयस्य संभावनम् ?

कर्म० : इस समय तुम यहाँ कैसे आ गये हो ?

धर्म० : प्रभातकाल में राजा किसी सुन्दरी के साथ बातचीत कर रहे थे । इसलिए अवसर पाकर मैं क्षणभर मनोविनोद के लिए यहाँ बैठा हूँ ।

कर्म० : मित्र ! राजा रात में क्यों नहीं सोये ?

धर्म० : राजा की आकृति से प्रतीत होता है कि वे आजकल भयभीत रहते हैं ।

कर्म० : राजा को भय । भय का क्या कारण है ?

धर्म० : उनके मन में सदा ही सूर्यास्त का भय बना रहता है ।

कर्म० : सूर्यास्त का भय क्यों ?

धर्म० : मित्र ! जब बद्ध पिञ्जरे से बिना द्वार खोले ही विशालकाय सिंह को चन्द्रगुप्त ने बाहर कर दिया तो उस समय से उसकी बुद्धिमता को देखकर उनके मन में चन्द्रोदय की संभावना बढ़ गयी । क्या तुम नहीं जानते हो ? इस राज्य में चन्द्रोदय की संभावना है । पुनः चन्द्रोदय तो तभी शोभता है जब सूर्यास्त होता है ।

कर्म० : चन्द्रगुप्त तो असहाय है, उसके उदय की संभावना कैसे ?

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

धर्म० : यदा महान् पण्डितश्चाणक्यः अत्र भवता राज्ञा तिरस्कृतः तदा एव चाणक्यस्य सूक्ष्मा दृष्टिः चन्द्रस्योपरिपतिता । यतः—

निशायां प्राप्तायां भवति यदिदृष्टेर्विफलता
तदा जाते चन्द्रे सकलजन दृष्टेः सफलता ।
जगत्यां छन्नायां निविड़बहुलैर्मग्न पुरुषाः
प्रकाशं वाञ्छन्ति प्रकटयति चन्द्रो निजप्रभाम् ॥१

तदनन्तरमेव चाणक्यः तस्य गुरुर्बभूव ।

कर्म० : किं चाणक्यस्तमध्यापयति ?

धर्म० : नहि केवलं स अध्यापयति प्रत्युत स चन्द्रगुप्तः नीति निष्णातो-जातः । चाणक्यस्य कुलपतित्वं को न जानाति ।

कर्म० : तथापि चन्द्रगुप्तात् भयं कथम् ?

धर्म० : राजा तु गृहस्थस्य सर्पस्य इव तस्माद्बिभेति ।

कर्म० : वालात् भयं व्यर्थम् ।

धर्म० : मित्र ! नोचितमिदं कथनम् । कुतः—

धर्म० : जब महान् पण्डित चाणक्य श्रीमान् राजा के द्वारा तिरस्कृत हुए तभी चाणक्य की सूक्ष्म दृष्टि चन्द्रगुप्त के ऊपर पड़ी, क्योंकि—

रात्रि के आगमन पर जब दृष्टि की विफलता हो जाती हैं तो चन्द्रमा के उदय होने पर ही सभी लोगों की दृष्टि सफल होती है । घनघोर अन्धकार से आवृत इस संसार में मग्न पुरुष जब प्रकाश चाहते हैं तब चन्द्र अपनी प्रभा प्रकट करता है ।।१

इसी के बाद चाणक्य उसका गुरु हो गया ।

कर्म० : क्या चाणक्य उसे पढ़ाते हैं ?

धर्म० : वे केवल पढ़ाते ही नहीं बल्कि वह चन्द्रगुप्त तो नीति निष्णात बना दिया गया । चाणक्य के कुलपतित्व को कौन नहीं जानता ।

कर्म० : फिर भी चन्द्रगुप्त से भय क्यों ?

धर्म० : राजा तो घर स्थित सर्प के समान उससे भयभीत होता है ।

कर्म० : बालक से भय क्यों ?

धर्म० : मित्र ! यह कहना उचित नहीं । क्योंकि—

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सत्यं जीर्णेषु सर्पेषु विषमौत्कट्यमद्भुतम्
परं बालेषु सर्पेषु विषं न्यूनायते कुतः ।।२

कर्म० : मित्र ! चाणक्येन रक्षितश्चन्द्रगुप्तः साम्प्रतं परं तेजस्वी जातः ?

धर्म० : आम् स परं तेजस्वी जातः ।

कर्म० : श्रुतं चाणक्यस्याश्रमे चन्द्रगुप्तः शिक्षामधिगतवानतएव राजकीया सहायताऽपि तत्र निरुद्धा इति ।

धर्म० : सत्यमेव राजपुत्राणामध्ययनार्थं तु कुलपतेः वररुचेराश्रमो विद्यते । अयं हि राजकीयवित्तेन पूर्णतया संचालितो भवति । चाणक्यस्याश्रमस्तु सामान्याश्रमः । तत्रानुग्रहराशिः राज्येन स्वीकृता आसीत् । परं सम्प्रति तस्यानुग्रहानुदानमपि स्थगितमस्ति ?

कर्म० : चन्द्रगुप्तस्याध्ययनमेव तत्रानुग्रहानुदानस्थगनस्य कारणमस्ति किम् ?

धर्म० : राज्ञः दृष्ट्या चन्द्रगुप्तस्याध्ययनं राजकीय सम्मानविरुद्धमतः राजाज्ञा निर्गता यत् तत्रानुग्रहानुदानराशिः रुद्धो भवेत् ।

सचमुच जीर्ण सर्प में उत्कट विष रहता है लेकिन बाल सर्प में क्या विष कम होता है ? ।।२

कर्म० : मित्र ! चाणक्य से रक्षित वह चन्द्रगुप्त इस समय काफी तेजस्वी हो गया है क्या ?

धर्म० : हाँ वह काफी तेजस्वी हो गया है ।

कर्म० : सुना कि चाणक्य के आश्रम में चन्द्रगुप्त ने शिक्षा ग्रहण की । अतः वहाँ राजकीय सहायता भी रोक दी गयी है ।

धर्म० : सच ही है । राजपुत्रों के अध्ययन के लिए कुलपति वररुचि का आश्रम है । यह आश्रम राजकीय धन से संचालित होता है । चाणक्य का आश्रम तो सामान्य आश्रम है वहाँ अनुग्रह राशि राज्य की ओर से स्वीकृत थी लेकिन इस समय उसका अनुग्रहानुदान भी स्थगित है ।

कर्म० : चन्द्रगुप्त का अध्ययन ही वहाँ अनुग्रहानुदान स्थगन का कारण है क्या ?

धर्म० : राजा की दृष्टि से चन्द्रगुप्त का अध्ययन राजकीय सम्मान के विरुद्ध हुआ । अतः राजाज्ञा निकली कि वहाँ अनुग्रहानुदान राशि रोक दी जाय ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कर्म० : इयं नीति तु असंगता। मित्र! अन्येषामाश्रमाणां का स्थितिः विद्यते ?

धर्म० : श्रूयते शिक्षा क्षेत्रे राज्ञः दृष्टिः उदारपूर्णा नास्ति। अतः सर्वेषामाश्रमाणां वित्तीय अवस्था दयनीया वर्तते।

कर्म० : मित्र! अनेन तु आश्रमाः शिथिलाः भविष्यन्ति तथा अस्मिन् राज्ये बहुसंख्यकाः मूर्खाः एव भविष्यन्ति।

धर्म० : किं कथयामि मित्र! यथा राजा तथा प्रजा तु विदितमेव।

कर्म० : चलतु मित्र! शीघ्रं राजभवनं चलतु। अकारणमावां सेवातः निष्काषितौ भविष्यावः।

धर्म० : चलतु (इति निष्क्रान्तौ)

(ततः प्रविशति एको ब्रह्मचारी)

ब्रह्म० : (इतस्ततः भ्रमन् ऊर्ध्वमवलोक्य स्वगतम्) कथमाश्रमेषु अन्नाभावः उत्पन्नः। कथं राज्यसंचालिताअपि आश्रमा। तथाभूताः। शतशो ब्रह्मचारिणः अस्मद् कुलपतिश्चान्ये गुरवः प्रायः सप्ताहात् कन्दमूलानि पत्राणि च भुङ्क्त्वा जीवनं यापयन्ति। शासनात् कदा अन्नं प्राप्स्यतीति न

कर्म० : यह नीति तो असंगत है। मित्र! अन्य आश्रमों की क्या स्थिति है ?

धर्म० : सुना जाता है कि शिक्षा क्षेत्र में राजा की दृष्टि उदार नहीं है। अतः सभी आश्रमों की वित्तीय अवस्था दयनीय है।

कर्म० : मित्र! इससे तो आश्रम शिथिल हो जायेंगे तथा इस राज्य में बहुसंख्यक मूर्ख ही होंगे।

धर्म० : क्या कहें मित्र! जैसा राजा वैसी प्रजा तो सर्वविदित ही है।

कर्म० : चलो मित्र! शीघ्र राजभवन चलें। अन्यथा अकारण ही हम दोनों सेवा से निकाल दिए जाएँगे।

धर्म० : चलो (निकल जाते हैं।)

(इसके बाद एक ब्रह्मचारी का प्रवेश)

ब्रह्म० : (इधर उधर घूमता हुआ ऊपर देखकर स्वगत) क्यों आश्रमों में अन्नाभाव उत्पन्न हो गया है। राज्य संचालित भी आश्रम वैसे ही हैं। सैकड़ों ब्रह्मचारी हम लोगों के कुलपति तथा अन्य गुरुगण प्रायः सप्ताह से कन्दमूल एवं पत्रों को खाकर जीवन बिता रहे हैं। शासन से कब अन्न प्राप्त होगा यह नहीं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

जाने । शासनस्येयमुपेक्षानीतिः अशोभना। छात्राणां कृते काऽपि व्यवस्था चारुतरा नास्ति। अन्नाभावः, जलाभावः, वस्त्राभावः, प्रकाशस्या भावः सर्वमस्ति। कथमन्तेवासिनां मध्ये विद्रोहो न भविष्यति।

(ततः प्रविशति अपरो ब्रह्मचारी)

द्वि० ब्र० : (प्रथमं ब्रह्मचारिणं दृष्ट्वा स्वगतम्) अये! अयमपि ब्रह्मचारी। परिचयं गृह्णामि, कुतः समायातः इति। (प्रकाशम्) भवान् प्रथमाश्रम सेवीति प्रतीयते ?

प्र० ब्र० : आम् अहमस्मि प्रथमाश्रमसेवी।

द्वि० ब्र० : कस्य कुलपतेराश्रमे निवसति भवान् ? भवतां नाम च किम् ?

प्र० ब्र० : अहं तु कुलपतेराचार्यवररुचेराश्रमे निवसामि। मां गुरवः सहाध्यायिनश्च धर्मदत्त इति कथयन्ति। भवानपि ब्रह्मचारीति लक्षणेन ज्ञायते। भवान् कस्मिन्नाश्रमे वसति। भवतां च नाम किमिति अहमपि ज्ञातुमिच्छामि।

जानता। शासन की यह उपेक्षा नीति अशोभन है। छात्रों के लिए कोई व्यवस्था सुन्दर नहीं है। अन्नाभाव, जलाभाव, वस्त्राभाव, प्रकाशाभाव सब कुछ है। अन्तेवासियों में विद्रोह क्यों नहीं होगा।

(इसके बाद द्वितीय ब्रह्मचारी का प्रवेश)

द्वि० ब्र० : (प्रथम ब्रह्मचारी को देखकर स्वगत) अये! यह भी ब्रह्मचारी है। परिचय प्राप्त करता हूँ कहाँ से आया है। (प्रकाश) आप प्रथमाश्रमसेवी हैं ऐसा प्रतीत होता है ?

प्र० ब्र० : हाँ, मैं प्रथमाश्रमसेवी हूँ।

द्वि० ब्र० : आप किस कुलपति के आश्रम में निवास करते हैं:? आपका नाम क्या है ?

प्र० ब्र० : मैं कुलपति आचार्य वररुचि के आश्रम में निवास करता हूँ। मुझे गुरुगण तथा सहाध्यायी धर्मदत्त कहकर सम्बोधित करते हैं। आप भी ब्रह्मचारी हैं ऐसा लक्षण से प्रतीत होता है। आप किस आश्रम में रहते हैं तथा आपका क्या नाम है, यह मैं भी जानना चाहता हूं।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

द्वि० ब्र० : अहमत्रभवतःआचार्यकुलपतेरार्यचाणक्यस्याश्रमस्य एको ब्रह्मचारी ममनाम श्रुतिधर इति।

धर्मदत्तः : आवां प्रथमाश्रमसेविनौ। अतः प्रथमाश्रमानुकूलमभिवादनं स्वीकरोतु भवान् (इति दक्षिणहस्तेन हृदयं स्पृशन् किञ्चित् नम्रीभूय अभिवादनमिति शब्दोच्चारणं करोति। सोऽपि तथा सम्पादयति।)

श्रुति० : अपि कुशली भवान्। अपि तत्रस्था गुरवो ब्रह्मचारिणश्च कुशलिनः?

धर्म० : मित्र! किं कुशलं पृच्छसि। साम्प्रतमस्माकमाश्रमस्य सर्वा व्यवस्था शिथिला अस्ति। शासन दोषात् प्रतीयते यच्छात्राणामुपद्रवो भविष्यति।

श्रुति० : कथ भवतामाश्रमस्य व्यवस्था शिथिला जाता। भवतामाश्रमस्तु राज्यसंचालितोऽस्ति। तत्र निखिला व्यवस्था राज्येन भवति। किं राज्ञः दृष्टिः शिक्षा क्षेत्रे उदासीना अस्ति?

द्वि० ब्र० : मैं श्रीमान् आचार्य कुलपति आर्य चाणक्य के आश्रम का एक ब्रह्मचारी हूँ। मेरा नाम श्रुतिधर है।

धर्मदत्त : हम दोनों प्रथमाश्रमसेवी हैं। अतः प्रथमाश्रम के अनुकूल अभिवादन आप स्वीकार करें। (इस प्रकार दाहिने हाथ से हृदय स्पर्श करता हुआ कुछ झुककर अभिवादन इस प्रकार का शब्दोच्चारण करता है। वह भी वैसे हीं सम्पादन करता है।

श्रुति० : आप कुशल तो हैं? आपके आश्रम के गुरुगण एवं ब्रह्मचारी-कुशल तो हैं?

धर्म० मित्र! क्या कुशल पूछते हो। इस समय हम लोगों के आश्रम की सारी व्यवस्था शिथिल है। शासन दोष से लगता है छात्रों का उपद्रव हो जाएगा।

श्रुति० : आपके आश्रम की व्यवस्था शिथिल कैसे हो गयी? आप लोगों का आश्रम तो राज्य संचालित है। वहाँ सारी व्यवस्था राज्य के द्वारा होती है। क्या राजा की दृष्टि शिक्षा क्षेत्र में उदासीन है?

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

धर्म० : किं कथयामि मित्र ! शासनसंचालितायाः व्यवस्थायाः विषये । आश्रमे कर्हिचिदन्नं न प्राप्नोति, कर्हिचित् वस्त्रं न प्राप्नोति, कर्हिचित् प्रकाशस्याभावः कर्हिचित् जलस्याभावो भवति । किं बहुना इतस्तु सप्ताहात् अन्नाभावो जलाभावो वस्त्राभावः प्रकाशाभावश्चेति सर्वं युगपदेव उपस्थितम् । राज्ञः दृष्टिः कुत्र स्थिता इति न वेद्मि । राज्याधिकारिणोऽपि कर्णेषु तैलंदत्वा तूलेन सम्यक् पिधाय निश्चिन्ताः विद्यन्ते ।

श्रुति० : सम्प्रति तत्राध्यापनस्य कीदृशी व्यवस्था विद्यते ? यतो हि—

ज्ञानार्जनमिहास्माकं लक्ष्यं सततमाश्रमे
प्राप्नुमस्तत्र श्रेयांसि प्रेयांसि क्षणिकाणिवै ॥३

धर्म० : त्वं तु जानासि मित्र ! प्राणाः कलावन्नगताः । अन्नहीनैः प्राणैर्ज्ञानालम्बनं न क्रियते । आश्रमस्थैर्गुरुभिस्तु ज्ञानं दीयते परमन्तेवासिनो तादृशाः योगरता न विद्यन्ते ये अल्पप्राणतया तदधिग्रहीतुं समर्थाः भवन्ति किमधिकम्—

धर्म० : क्या कहूँ मित्र ! शासन संचालित व्यवस्था के विषय में । आश्रम में कभी अन्न नहीं मिलता है तो कभी वस्त्र नहीं, कभी प्रकाश का अभाव होता है तो कभी जल का अभाव । अधिक क्या कहें इधर तो एक सप्ताह से अन्नाभाव, जलाभाव, वस्त्राभाव और प्रकाशाभाव सभी एक बार ही उपस्थित हो गये हैं । राजा की दृष्टि कहाँ स्थित है यह नहीं जानता । राज्याधिकारी भी कान में तेल डालकर उसे रूई से सम्यक् ढँककर निश्चिन्त हैं ।

श्रुति० : इस समय वहाँ अध्यापन की कैसी व्यवस्था है ? क्योंकि— आश्रम में ज्ञानार्जन करना ही हमलोगों का लक्ष्य रहता है, वहीं श्रेय की प्राप्ति होती है, निश्चय ही प्रेयवस्तु क्षणिक हैं ॥३

धर्म० : तुम तो जानते हो मित्र ! कलियुग में प्राण अन्नगत हैं । अन्नहीन प्राण के द्वारा ज्ञानालम्बन नहीं होता । आश्रमस्थ गुरुओं के द्वारा ज्ञान तो दिया जाता है लेकिन छात्र उस प्रकार के योगरत नहीं हैं जो अल्प प्राण होने पर भी उसे ग्रहण करने में समर्थ हों । अधिक क्या—

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

बुभुक्षितैर्व्याकरणं न भुज्यते न पीयते काव्यरसः पिपासितैः
सांख्यस्य तत्त्वं नहि बुध्यते क्वचित् न ब्रह्मभासो न च साधन
क्रिया ।।४

श्रुति० : अस्ति तु भवद्वाक्यं सत्यम् । शासने दोषः समापतदिति प्रतीयते ।

धर्म० : भवतामाश्रमस्य कीदृशी व्यवस्था विद्यते ?

श्रुति० : अस्माकमाश्रमस्य सर्वे ब्रह्मचारिणो स्वाश्रिताः सन्ति । शासन सहायता तु तत्र स्थगिता अस्ति । तथापि व्यावहारिके कर्मणि दक्षाः सर्वे ब्रह्मचारिणो आश्रमस्याभिवृद्धये यतमानाः परिश्रमेण प्रभूतमन्नमुत्पादयन्ति । तत्र फलानि पुष्पाणि च प्रभूतानि सन्ति । किमधिकमस्माकं कुलपतेः सिद्धान्तमनु पालनपरोजनः कदापि दुःखभाग् न भविष्यति ।

धर्म० : भवतां कुलपतेरादर्शभूतः सिद्धान्तः कः ?

श्रुति० : वेदवाक्यादृते नान्यः सिद्धान्तः अस्मद्गुरुचरणानाम् । जानन्त्येव भवन्तः शुक्लयजुर्वेदस्य मन्त्रमिमम्—

भूखा व्यक्ति व्याकरण नहीं खा सकता, पिपासित व्यक्ति काव्य रस का पान नहीं कर सकता, सांख्य का तत्वं उसके द्वारा नहीं जाना जा सकता तथा ब्रह्मभास एवं साधन क्रिया भी नहीं होती ।।४

श्रुति० : आप के वाक्य तो सत्य हैं । शासन में दोष आ गया है ऐसा प्रतीत होता है ।

धर्म० : आपके आश्रम की इस समय कैसी व्यवस्था है ?

श्रुति० : हम लोगों के आश्रम के सभी ब्रह्मचारी स्वाश्रित हैं । शासन की सहायता तो वहाँ बन्द है, लेकिन व्यावहारिक कर्म में दक्ष सभी ब्रह्मचारीगण आश्रम की अभिवृद्धि के लिए प्रयास करते हुए काफी अन्न उत्पन्न करते हैं । वहाँ फल एवं पुष्प काफी मात्रा में हैं । अधिक क्या कहें हम लोगों के कुलपति के सिद्धान्त का पालन करने वाला व्यवित कभी भी दुःखी नहीं हो सकता ।

धर्म० : आपके कुलपति का आदर्शभूत सिद्धान्त क्या है ?

श्रुति० : वेद वाक्य के अतिरिक्त और कोई सिद्धान्त हम लोगों के गुरुवर का नहीं है । शुक्ल यजुर्वेद का यह मन्त्र आप तो जानते ही हैं—

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

"*कुर्वन्नेवेह कर्माणि जिजीविषेद् शतं समाः
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ॥५

धर्म० : ज्ञातस्तु मया मन्त्रोऽयम्। शिक्षायाः व्यावहारिकतां प्रति अयं संकेतयति इत्यपि जानामि। तथापि विद्यार्थीनां कृते कथमयं सिद्धान्तः अनुकूलो भविष्यति। ते तु अध्ययने निरता भवन्ति। धनार्जनमन्यत् ज्ञानार्जनमन्यत्।

श्रुति० : मित्र! विषयाणां पूर्णज्ञानं केवलं सैद्धान्तिकेन ज्ञानेन न भवति। तेषां पूर्ण ज्ञानं तु व्यावहारिकेन ज्ञानेन जायते। यतो हि—

ज्ञानं सम्पूर्णतां याति व्यवहारेण केवलम्
बहूनां विषयाणां हि ज्ञानं भारः क्रियां बिना ॥६

धर्म० : अहमप्यनुभवामि व्यावहारिकीयायाः शिक्षायाः महत्त्वम्। किन्तु अस्माकमाश्रमे सैद्धान्तिकी शिक्षा एव केवलं दीयते। तत्र व्यावहारिकी शिक्षाया अभावो विद्यते। प्रतीयते भवतां कुलपतिः नीतिसम्पन्नः व्यावहारिकश्च।

*शु० य० वे० ४०/२

इस संसार में कर्म करता हुआ व्यक्ति पूर्ण आयु पर्यन्त जीने की इच्छा करे। इस प्रकार किये जाने वाले कर्म मनुष्य में लिप्त नहीं होंगे। इससे श्रेष्ठ मुक्ति का कोई दूसरा मार्ग नहीं है ॥५

धर्म० : यह मन्त्र तो मुझे भी ज्ञात है। शिक्षा की व्यावहारिकता के प्रति यह संकेत करता है यह भी मैं जानता हूँ, फिर भी विद्यार्थियों के लिए यह सिद्धान्त कैसे अनुकूल होगा! वे तो अध्ययन में निरत रहते हैं। धनार्जन अलग चीज है तथा ज्ञानार्जन अलग।

श्रुति० : मित्र! विषयों का पूर्ण ज्ञान केवल सैद्धान्तिक ज्ञान से नहीं होता। उसका पूर्ण ज्ञान व्यावहारिक ज्ञान से होता है। क्योंकि— व्यवहार से ही ज्ञान पूर्ण होता है। निश्चय ही बहुत विषयों का ज्ञान व्यवहार के बिना भारस्वरूप होता है ॥६

धर्म० : मैं भी व्यावहारिकी शिक्षा का महत्व अनुभव करता हूँ, किन्तु हम लोगों के आश्रम में सैद्धान्तिकी शिक्षा ही केवल

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रुति० : किमत्र कथनम् । स्वकीयेन मुखेन प्रशंसया किम् ? अस्माकमाश्रमे तु असंख्याः छात्राः सैद्धान्तिकी शिक्षायां व्यावहारिकी शिक्षायां च निरताः सन्ति । इदमेव प्रमाणम् ।

धर्म० : मित्र ! अहं भवतामाश्रमं द्रष्टुमिच्छामि ।

श्रुति० : चलतु मित्र ! अस्माकमाश्रमे तु सर्वे समादृता भवन्ति । उभौ भ्रमन्तौ निष्क्रान्तौ)

(चाणक्यः आश्रमस्य कुट्यां कुशासनस्थोऽपि अर्थशास्त्र रचनायां संलग्नोऽस्ति (ततः प्रविशतः उभौ ब्रह्मचारिणौ)

श्रुति० : मित्र ! इतः पश्यतु आश्रमस्य प्रयोगभूमिम् अत्रहि—

वृक्षाः पङ्क्तिषु रोपिता बहुविधाः सिक्तास्तथा पालिताः
नाना पुष्पलताश्च पुष्पसहिताः पत्रान्विता रक्षिताः ।
अन्ये ये फलपुष्पभारनमिता वृक्षा लता पादपाः
वायोरागमनेन कम्पशिखराः संस्वागताय स्थिताः ॥७

धर्म० : सत्यं मित्र ! आश्रमस्याभिवृद्धि वीक्ष्यातितरां मे प्रसीददन्तःकरणम् । कुतः

दी जाती है । वहाँ व्यावहारिकी शिक्षा का अभाव है । लगता है आपके कुलपति नीति सम्पन्न एवं व्यावहारिक हैं ।

श्रुति० : इसमें कहना क्या । अपने मुख से प्रशंसा करना क्या । हम लोगो के आश्रम में तो असंख्य छात्र सैद्धान्तिकी एवं व्यावहारिकी शिक्षा में निरत हैं यह ही प्रमाण है ।

धर्म० : मित्र ! मैं आपका आश्रम देखना चाहता हूँ ।

श्रुति० : चलो मित्र, हमलोगों के आश्रम में तो सभी समादृत होते हैं । (दोनों घूमते हुए निकल गयें ।)

आश्रम की कुटी में कुशासन पर भी बैठा चाणक्य अर्थशास्त्र रचना में संलग्न है इसके बाद ब्रह्मचारियों का प्रवेश)

श्रुति० : मित्र, इधर देखो आश्रम की प्रयोग भूमि को । यहाँ—

वृक्ष पंक्तिबद्ध रोपे गये है, तथा अनेक प्रकार से वे सिञ्चित एवं पालित हैं । अनेक प्रकार की पुष्पलताएँ पत्र एव पुष्पों से युक्त हैं, रक्षित हैं । दूसरे जो फल एवं पुष्प के भार से नवे हुए वृक्ष, लता एवं पादप हैं वे हवा के चलने से कम्पित-शिखर वाले स्वागत के लिए स्थित हैं ॥६

धर्म० : सचमुच मित्र, आश्रम की अभिवृद्धि देखकर मेरा अन्तः-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कुट्यः पङ्क्तिषु विस्तृताश्च वहुशः नूनं तृणाच्छादिताः
पार्श्वे प्रस्फुटिताङ्कुरैर्वहुविधैः क्षेत्रं ततः राजते।
नद्यः भान्ति समन्ततः सुरुचिराः स्वच्छैर्जलैः पूरिताः
वेदाभ्यास समुद्भवैश्च ध्वनिभिः स्वर्गायते आश्रमः ।।८

श्रुति० : मित्र ! इतः पश्यतु अस्माकं कुलपतेर्भवनम् ।

धर्म० : (दृष्ट्वा साश्चर्यं स्वगतम्) अतीव सामान्योऽयमाश्रमः (प्रकाशम्) अस्यां कुट्यां भवतां कुलपतिः निवसति ?

श्रुति० : आम् ।

धर्म० : (स्वगतम्) अयं कुशास्तरणस्थः कोऽपि तेजस्वी प्रतीयते, सम्प्रति अध्यापनकार्ये संलग्नोऽस्ति (प्रकाशम्) किम अयमेव कुलपतिः ?

श्रुति० : एवम् । अयमेवास्माकमाश्रमस्य कुलपतिः ।

धर्म० : (स्वगतम्) परितः छात्राः विद्यन्ते, ते लेखनकार्ये व्यापृताः सन्ति । गुरुः उपदिशति छात्राः लेखबद्धं कुर्वन्ति । (प्रकाशम्) सम्प्रति अत्र किं भवति ।

करण अत्यन्त प्रसन्न है क्योंकि—तृण से आच्छादित बहुत सी कुटियाँ पंक्ति में फैली हुई हैं। आस पास के अनेक प्रकार के प्रस्फुटित अङ्कुरों से युक्त खेत सुशोभित हैं। स्वच्छ जल से परिपूर्ण नदियाँ चारो ओर शोभ रही हैं। वेदाभ्यास से उत्पन्न ध्वनियों से सचमुच यह आश्रम स्वर्ग के समान आचरण कर रहा है ।।८

श्रुति० : मित्र, इधर देखो हमलोगों के कुलपति का भवन ।

धर्म० : (देखकर, आश्चर्य के साथ स्वगत) यह बहुत ही सामान्य आश्रम है ! (प्रकाश) इस कुटी में आपके कुलपति रहते हैं ?

श्रुति० : हाँ ।

धर्म० : (स्वगतम्) कुशासन पर बैठा हुआ यह कोई तेजस्वी लग रहा है। इस समय अध्यापन कार्य में संलग्न हैं। (प्रकाश) क्या यही कुलपति हैं ?

श्रुति० : हाँ, मेरे आश्रम के यही कुलपति हैं ।

धर्म० : (स्वगत) चारो ओर छात्र हैं वे लेखन कार्य में संलग्न हैं। गुरु उपदेश कर रहे हैं तथा छात्र उसे लेखबद्ध कर रहे हैं। (प्रकाश) इस समय क्या हो रहा है ?

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रुति० : साम्प्रतमर्थशास्त्रस्योपदेशं चलति।

धर्म० : किमिदमर्थशास्त्रम् ?

श्रुति० : सैद्धान्तिकी व्यावहारिकी शिक्षायाः इदमेव राज्यकल्याणमूलं शास्त्रम् ।

धर्म० : केनरचितमिदम् ?

श्रुति० : अस्माकं कुलपतिना इदं रचितम्। साम्प्रतं भवान् पश्यतु अस्माकं कुलपतिः अर्थशास्त्रस्य तत्त्वमुपदिशति उपस्थिताश्चोच्चकक्षायाः छात्रास्तानुपदेशान् लेखबद्धं कुर्वन्ति ।

धर्म० : (दृष्ट्वा) चलतु मित्र ! अन्यत्रापि दर्शनाय (इति निष्क्रान्तौ)

चाण० : (छात्रान् प्रति) अर्थशास्त्ररचना सम्पन्ना। अस्यामर्थनीति राजनीतिदण्डनीतिप्रभृतयो विषयाः प्रामुख्येन प्रतिपादिताः। अस्य अनेकेप्रतयः शोभनैरक्षरैः लसन्तीति दृष्ट्वा नवजात पुत्रस्य स्पर्शसुखमिवानुभवामि। भवद्भिः एतादृशी शिक्षा लब्धा। व्यावहारिकजीवनेऽपि एतादृशमेवाचरणीयम ।

श्रुति० : इस समय अर्थशास्त्र का उपदेश चल रहा है।

धर्म० : यह अर्थशास्त्र क्या है ?

श्रुति० : सैद्धान्तिक एवं व्यावहारिक शिक्षा का यही राज्यकल्याण-मूलक शास्त्र है।

धर्म० : इसे किसने रचना की ?

श्रुति० : मेरे कुलपति ने इसकी रचना की है। अभी आप देखें कि हमारे कुलपति अर्थशास्त्र के तत्व का उपदेश करते हैं और छात्र लेखबद्ध करते हैं !

धर्म० : चलो मित्र, दूसरी जगह भी देखनी है। (निकल जाते हैं।)

चाण० : (छात्रों के प्रति) अर्थशास्त्र की रचना सम्पन्न हो गयी। इसमें अर्थनीति, राजनीति एवं दण्डनीति आदि विषय प्रमुख रूप में प्रतिपादित हैं। इसकी अनेक प्रतियाँ सुन्दर अक्षरों में सुशोभित है जिसे देखकर नवजात पुत्र के स्पर्शसुख के समान मैं आनन्द का अनुभव कर रहा हूँ। आप लोगों ने इसी प्रकार की शिक्षा प्राप्त की है। व्यावहारिक जीवन में भी इसी प्रकार का आचरण करना चाहिये।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

छात्राः : (समवेत स्वरेण) राज्येऽपि एतादृशी व्यवस्था भविष्यति नेपथ्ये टन् टन् टन् इति घण्टा ध्वनिः)

चाण० : (घण्टाध्वनिं श्रुत्वा) अयं संकेतध्वनिः श्रूयताम् । सम्प्रति प्रार्थना कालः । भवन्तः अत्रैव प्रार्थनां कुर्वन्तु ।

छात्राः : यथाज्ञापयति आचार्यः (सर्वे आसनादुत्थाय करौ सम्पुटीकृत्य गायन्ति)

भारती भारते भासतां सर्वदा,
ज्ञानशून्या जना राज्य संचालकाः
अन्धकारावृता मत्सराः स्वार्थिनो
उल्लुकस्यवे दृष्ट्यायताऽत्रस्थिताः
ज्ञानवन्तो भवन्तु प्रसन्नाः सदा ॥९
भारती भारते भासतां सर्वदा

गच्छतात तत्तमः भारतात् भूतलात्
ज्ञानपुञ्जप्रभा भासतां दीप्यताम्
वारभोग्यामही कर्मभोग्यामही
वीरकर्मायुवा राजतामेकदा ॥१०
भारती भारते भासतां सर्वदा

छात्रगण : (समवेत स्वर में) राज्य में भी इसी प्रकार की व्यवस्था होगी (नेपथ्य में टन टन टन की घण्टाध्वनि)

चाण० : (घण्टाध्वनि को सुनकर) इस संकेत ध्वनि को सुनें। यह प्रार्थना का समय है। आप लोग यहीं प्रार्थना करें।

छात्राः : आचार्य को जो आज्ञा (सभी आसन से उठकर हाथ जोड़कर गाते हैं)

भारत में भारती सदा विभूषित हो। राज्य सचालक व्यक्ति जो ज्ञानशून्य है, अन्धकारावृत है, मत्सर, स्वार्थी एवं उल्लूक की दृष्टि से युक्त हैं। ज्ञानवान एवं सदा प्रसन्न हों ॥९॥ भारतभूमि से वह अन्धकार समाप्त हो जाय तथा ज्ञानपुञ्ज की प्रभा वहाँ दीप्त हो। यह पृथिवी वीरभोग्या एवं कर्मभोग्या है एक बार यहाँ वीर कर्मायुवा विभूषित हों ॥१०

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शासको रागद्वेषैरभिप्रेरित:
चाटुकारावृतः लोललासैर्युतः
यः प्रजाकष्टदः न प्रजापालकः
सो ह्यधः गच्छतात् भारतादन्यथा ॥११
भारती भारते भासतां सर्वदा
ज्ञानमार्गेण सत्यश्रमैः केवलम्
राज्यसंचालनं वा प्रजा पालनम्
योजना चापि सत्याश्रिता राजताम्
देशकल्याण हेतोः सदालक्ष्यदा ॥१२
भारती भारते भासतां सर्वदा
राज्यमेतद्भवेत् ज्ञानमार्गाश्रितम्
कर्मदक्षैर्जनैः सेवकैः पूरितम् ।
लुण्ठनं लुञ्चनं पीडनं स्वैरणम्
भारताद् गच्छतादञ्जसा सर्वथा ॥१३
भारती भारते भासतां सर्वदा

(इति पटाक्षेपः)
(अर्थशास्त्ररचना नाम चतुर्थोऽङ्कः समाप्तः)

शासक रागद्वेष से अभिप्रेरित, चाटुकारों से आवृत लोल लास से युक्त, जो प्रजा को कष्ट देने वाले हैं तथा प्रजा पालन करने वाले नहीं हैं वह इस भारत से अधः (नीचे) जाय ॥११

ज्ञानमार्ग एवं सत्यश्रम से ही केवल राज्य का संचालन हो तथ प्रजा का पालन हो। सत्य पर आश्रित योजना सदा लक्ष्य के अनुकूल हो तथा देश के कल्याण के लिए हो ॥१२

यह राज्य ज्ञानमार्गाश्रित हो। कर्मदक्ष प्रजा एव सेवकों से यह राज्य भरा हो। लूटना, ठगना, पीड़ित करना तथा भ्रष्टाचरण भारत से पूर्ण रूप में हट जाए। भारत में भारती सदा विभूषित हो ॥१३

(पटाक्षेप)
(अर्थशास्त्र रचना नामक चतुर्थ अक समाप्त)

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पञ्चमोऽङ्कः

(ततः प्रविशति शिरोवेदनां नाटयन् भद्रकः)

भद्रकः : (स्वगतम्) सेवावृत्तिः कष्टप्रदा। इतः मामनुगस्य क्षुद्रकस्य पदोन्नतिः, अग्रगस्य अहर्निशं सेवानिरतस्य च मम यथास्थितिः किं करिष्यामि यस्मिन् राज्ये शाकं मधुरञ्च समानमूल्ये विक्रीणाते। कष्टमयमिदं जीवनं यापनीयमेव। अत्र कस्य कः शृणोति। अनया चिन्तया मां शिरोवेदना बाधते।

(ततः प्रविशति रुद्रकः)

रुद्रकः : (स्वगतम्) अये! भद्रकः अत्रैव विद्यते। पृच्छामि तावत् (निकटं गत्वा प्रकाशम्) मित्र, भद्रक, किमत्र करोति भवान्?

भद्रकः : (द्रष्टुमभिनयं कृत्वा) समागतः मित्र! किमहं करिष्यामि। अद्य महती मे शिरोवेदना बाधते।

रुद्रकः : रात्रौ निद्रा नागता किम्?

पंचम अंक

(शिरो वेदना का अभिनय करते हुए भद्रक का प्रवेश)

भद्रकः : (स्वगत) सेवावृत्ति बड़ा ही कष्टप्रद है। इधर मेरे पीछे आने वाले क्षुद्रक की पदोन्नति तथा आगे नियुक्त दिन रात सेवा में तत्पर मेरी यथास्थिति। क्या करें, जिस राज्य में साग और मिठाई समान मूल्य में बिकते हैं। कष्टमय यह जीवन व्यतीत करना ही है। यहाँ कौन किसका सुनता है। इस चिन्ता से मुझे शिरोवेदना हो रही है।

(इसके बाद रुद्रक का प्रवेश)

रुद्रकः : (स्वगत) अये! भद्रक यही है। पूछता हूँ तबतक, (निकट जाकर, प्रकाश) मित्र भद्रक, आप यहाँ क्या करते हैं?

भद्रकः : (देखने का अभिनय करके) आ गये मित्र। क्या मैं करूँगा। आज मुझे जोरों का सिर दर्द है।

रुद्रकः : क्या रात में निद्रा नहीं आयी?

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भद्रकः : त्वं तु जानास्येव यत् क्षुद्रकेन चाटुकारितायाः प्रभावेनपदोन्नतिर्लब्धा। अस्माभिरहर्निशं सेवारतैश्च यथास्थितिरधिगता। किमिदं चिन्तायाः वार्ता नास्ति ?

रुद्रकः : अस्ति तु। किमिदमस्ति कारणं तव शिरोवेदनायाः ?

भद्रकः : अहं तु अनुभवामि, अनया चिन्तया निद्रा न आगच्छति तथा शिरोवेदनाऽपि बाधते।

रुद्रकः : अहमपि शिरोवेदनया पीड़ितोऽस्मि। चलतु मया सार्धम् औषधस्य व्यवस्थां करिष्यावः ?

भद्रकः : अस्मिन् राज्ये औषधं नास्ति। कुतः—

चाटुकारावृतो राजा राजयानस्य वाहकः
अज्ञानं तत्कशा यत्र तस्य यानस्य का कथा ।।१

पुनः—**स्वाभाविकस्य रोगस्य दृश्यते विविधौषधम्**
अपमानाभिजातस्य मनोरोगस्य नौषधम् ।।१२

रुद्रकः : औषधस्य व्यवस्था तु करणीया एव। चलतु मयासार्धम्। (इति उभौ निष्क्रान्तौ)

भद्रक : तुम तो जानते ही हो कि चाटुकारिता के प्रभाव से क्षुद्रक की पदोन्नति हुई तथा दिन रात सेवा करने वाले भी हमलोग यथास्थिति में रहे। क्या यह चिन्ता की बात नहीं है ?

रुद्रक : चिन्ता की बात तो है क्या तुम्हारी शिरोवेदना का यही कारण है ?

भद्रक : मैं तो अनुभव करता हूँ। इसी चिन्ता में रात में निद्रा नहीं आती तथा शिरदर्द भी हो गया है।

रुद्रक : मैं भी शिरोवेदना से पीड़ित हूँ। चलो मेरे साथ, हम दोनों औषध की व्यवस्था करें।

भद्रक : इस राज्य में औषध नहीं है। क्योंकि—जहाँ चाटुकारों से आवृत राजा राज्यरूपी गाड़ी के वाहक हो तथा अज्ञानरूपी उसकी कशा हों उस यान की क्या कथा।।१

पुनः– स्वाभाविक ढंग से होने वाले रोग की तो अनेक औषधियाँ होती हैं लेकिन अपमान से उत्पन्न मनोरोग के लिए औषधि नहीं है।।२

रुद्रक : औषध की व्यवस्था तो करनी ही है। मेरे साथ चलो (दोनों निकल जाते हैं।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(चाणक्यः कुशास्तरणे विराजते । द्वारदेशे एकः शिष्यः उपस्थितो अस्ति । ततः प्रविशति जटासम्पन्नः एको ब्रह्मचारी)

ब्रह्मचारी : (इतस्ततः पश्यन् स्वगतम्) व्यवस्था तु मया सम्पादिता। प्रजासु भेदनीतिः सम्प्रति प्रभावपूर्णा जाता। नन्द राज्ये प्रायेण उच्चपदस्थाः सेवकाः पदाधिकारिणश्च आचार्य चाणक्यस्य शिष्या एव। राज्ञः नन्दस्यात्मरक्षायामपि वैयक्तिक्कार्यसम्पादनाय सर्वे जना अत्रथा ममसहचरा एव नियुक्ताः सन्ति। ये ये पदाधिकारिणः राज्ञः विश्वासभूमयः आसन् ते तु सम्प्रति राजानंप्रति उदासीनाः जाताः! साम्प्रतं वृत्तमिदं सूचयितुमार्यच.णक्यस्यावासभवनमेव गच्छामि। (किञ्चिद्भ्रमन् अग्रे अवलोक्य) इदमार्यचाणक्यस्यावासभवनम्। प्रविशामि तावत् (किञ्चिद्भ्रमणंकृत्वा) आचार्यस्य भवनद्वारे एकः शिष्यो विराजते। आचार्य चाणक्यस्तु महान् नीतिज्ञः। नन्दस्य गुप्तचरा अत्र न आगच्छेयुरिति सर्वदा सावधानस्तिष्ठति आचार्य प्रवरः। पृच्छामि तावत् (प्रकाशम्) ब्रह्मचारिन् तव गुरुः अत्र विराजते ?

(चाणक्य कुशास्तरण पर बैठा है। द्वारदेश पर एक शिष्य उपस्थित है। इसके बाद जटा से युक्त एक ब्रह्मचारी का प्रवेश।)

ब्रह्मचारी : (इधर उधर देखता हुआ, स्वगत) व्यवस्था तो मैंने कर ली है। प्रजाओं में भेदनीति भी इस समय प्रभावपूर्ण है। नन्द राज्य में प्रायः उच्चपदस्थ सेवक और पदाधिकारी आचार्य चाणक्य के शिष्य ही हैं। राजानन्द की आत्मरक्षा में वैयक्तिक कार्यसम्पादन के लिए सभी व्यक्ति यहाँ के मेरे सहचर ही नियुक्त हैं। जो जो पदाधिकारी राजा के विश्वासपात्र थे वे तो राजा के प्रति उदासीनहो गये हैं। इस समय इस समाचार को सुनाने के लिए आचार्य चाणक्य के निवास स्थान पर जाता हूँ। घूमता हुआ आगे देखकर) यह आचार्य चाणक्य का आवास-भवन है। जबतक प्रवेश करता हूँ (कुछ घूमकर) आचार्य के भवन पर एक शिष्य है। आचार्य चाणक्य तो महान् नीतिज्ञ हैं। नन्द के गुप्तचर यहाँ नहीं आवें अतः सदा आचार्यप्रवर सावधान रहते हैं। तबतक पूछता हूँ (प्रकाश, ब्रह्मचारी, क्या आप के गुरुयहाँ हैं ?

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिष्यः : आम् । अत्रैवाऽत्रभवान् चाणक्यो विराजते ।

ब्रह्म० : अहमत्रभवन्तं द्रष्टुमिच्छामि ।

शिष्यः : सम्प्रति महत्त्वपूर्णे कार्ये व्यस्ततया नाऽत्रभवान् केनापि मिलति ।

ब्रह्म० : श्रीमतां गुरूणां साक्षात्कारः सम्प्रति आवश्यकः । तत्र गत्वा त्वया प्रष्टव्यः ।

शिष्यः : भवतां कः परिचयः ?

ब्रह्म० : अहमस्मि एको ब्रह्मचारी । अत्रभवान् चाणक्यः वस्त्रवैदूर्य रूपेण मां जानाति ।

शिष्यः : प्रतीक्षतु भवानत्र यावदहमागच्छामि ।
(ब्रह्मचारी द्वारि विराजते । शिष्यः सत्वरं चाणक्यस्य निकटं गत्वा) प्रणमत्येषः शिष्यः । (इति साञ्जलिः प्रणमति)

चाण० : द्वारि कः तिष्ठति ?

शिष्यः : एको ब्रह्मचारी भवन्तं द्रष्टुमिच्छति । सः कथयति यत् भवतां गुरुः मां वस्त्रवैदूर्य रूपेण जानाति ।

शिष्य : हाँ । श्रीमान् चाणक्य यहीं हैं ।

ब्रह्म० : मैं श्रीमान् का दर्शन करना चाहता हूँ ।

शिष्य : इस समय महत्वपूर्ण कार्य में व्यस्त होने के चलते वे किसी से नहीं मिलते हैं ।

ब्रह्म० : आपके गुरु का साक्षात्कार परमावश्यक है । आप वहाँ जाकर पूछें ।

शिष्य : आपका परिचय क्या है ?

ब्रह्म० : मैं एक ब्रह्मचारी हूँ । श्रीमान् चाणक्य मुझे वस्त्रवैदूर्य के रूप में जानते हैं ।

शिष्य : आप यहाँ प्रतीक्षा करें जबतक मैं आता हूँ ।
(ब्रह्मचारी द्वार पर ठहरते हैं । शिष्य चाणक्य के निकट जाकर) यह शिष्य आपको प्रणाम करता है । (अञ्जलि बांधे प्रणाम करता है ।)

चाण० : द्वार पर कौन है ?

शिष्य : एक ब्रह्मचारी आप से मिलना चाहते हैं । वे कहते हैं कि आपके गुरुदेव मुझें वस्त्रवैदूर्य के रूप में जानते हैं ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चाण० : (किञ्चिद्विचार्य स्वगतम्) वस्त्रमम्बरं तस्यवैदूर्यम् सूर्यः, ज्ञातम् सूर्यायनो समागतः (प्रकाशम्) शीघ्रं प्रवेशयतु।

शिष्यः : यथाज्ञापयति आचार्यः (इति सत्वरं द्वारदेशं गत्वा ब्रह्मचारिणं प्रति) चलतु भवान् मया सार्धम् (उभौ चाणक्यस्य निकटे गच्छतः)।

सूर्यायनः : सूर्यायनोऽहमभिवादये।

चाण० : अये ! सूर्यायनः स्वस्त्यस्तु। अत्रोपविश (इति कुशास्तरणं संकेतयति)

सूर्या० : यथाज्ञापयति आचार्यः (इति उपविशति)

चाण० : (शिष्यं प्रति) भवान् द्वारदेशं गच्छतु !

शिष्यः : यथाज्ञापयति आचार्यः (सप्रणाम द्वारदेशं गच्छति)

चाण० : सूर्यायन ! कीदृशी व्यवस्था त्वया तत्र सम्पादिता ?

सूर्या०: : गुरुदेव ! नन्दस्याङ्गरक्षकरुपिणौ यौ वीरौ आस्ताम् तौ विश्वास शून्यौ राज्ञा निर्गतौ। तयोः स्थाने च अस्माकं सहचरौ ब्रह्मदत्तयज्ञदत्तौ नियुक्तौ स्तः।

चाण० : (कुछ विचार कर स्वगत) वस्त्र = अम्बर उसका वैदूर्य = मणि = अम्बरमणि-सूर्य, जान गया, सूर्यायन आ गया (प्रकाश) शीघ्र ही प्रवेश कराओ।

शिष्यः : आचार्य की जो आज्ञा (इस प्रकार शीघ्र ही द्वार पर जाकर ब्रह्मचारी के प्रति) आप मेरे साथ चलें (दोनों चाणक्य के निकट जाते हैं।)

सूर्यायन : मैं सूर्यायन आपका अभिवादन करता हूँ।

चाण० : अये ! सूर्यायन, तुम्हारा कल्याण हो। यहाँ बैठो (कुशास्तरण का संकेत करते हैं।)

सूर्या० : आचार्य की जो आज्ञा (बैठ जाता है)

चाण० : (शिष्य के प्रति) आप द्वार पर जाएँ।

शिष्यः : आचार्य की जो आज्ञा (सप्रणाम द्वार देश चला जाता है)

चाण० : सूर्यायन ! तुमने वहाँ कैसी व्यवस्था की ?

सूर्या० : गुरुदेव ! नन्द के अंगरक्षक के रूप में जो दो वीर थे वे विश्वास से शून्य राजा के द्वारा निकाल दिए गये। उन दोनों के स्थान में हमलोगों के सहचर ब्रह्मदत्त एवं यज्ञदत्त नियुक्त हैं।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चाण० : (स्वगतम्) लक्ष्ये एव वाणाः पतिताः। (प्रकाशम्) नन्दस्य सेनायाः का स्थितिः विद्यते ?

सूर्या० : तस्य प्रधानसेनापतिस्तु अस्माभिरनुमतः। यतो हि राज्ञा कनिष्ठाः पदाधिकारिणो वरिष्टानतिक्रम्य पदोन्नतिं गताः। फलतः सर्वे वरिष्ठाः पदाधिकारिणो शासनादप्रसन्नाः सन्ति कुतः—

ये सेनापतयो महाबलयुताः वीराः स्वकर्मस्थिताः
सेनाचालन तत्पराः कुशलिनो सर्वे विरक्तं गताः
राजाज्ञां शिरसा वहन्ति नितरां भावैः नहि प्रेमभिः
कार्यं वीक्ष्य ह्यसंगतं भुवि नराः खिन्ना भवन्त्यवे ते ॥२

चाण० : किन्ते कनिष्ठाः पदाधिकारिणस्तस्य कुटुम्बिनः सन्ति ?

सूर्या० : नहि श्रीमन् ते कुटुम्बिनो न विद्यन्ते। ते तु उत्कोच दानैः चाटुभिर्वचनैश्च उन्नतिं प्राप्तवन्तः।

चाण० : राज्ञः नन्दस्य स्थितिः सम्प्रति कीदृशी अस्ति ?

सूर्या० : स विलासी राजा सम्प्रति नृत्यायोजने पानगोष्ठ्याञ्च व्यापृतस्तिष्ठति।

चाण० : (स्वगत) लक्ष्य में ही वाण लगे। (प्रकाश) नन्द क सेना की क्या स्थिति है ?

सूर्या० : उसका प्रधान सेनापति तो हम लोगों का अनुयायी है क्योंकि राजा ने वरिष्ठ पदाधिकारियों को अतिक्रमण कर कनिष्ठ पदाधिकारियों को प्रोन्नति दी है। परिणामस्वरूप सभी वरिष्ठ पदाधिकारी शासन से अप्रसन्न हैं। क्योंकि जो सेनापति महाबलशाली, वीर, अपने कर्म में स्थित, सेना संचालन में तत्पर तथा कुशल थे वे सभी विरक्त हो गये। वे लोग राजज्ञा का पालन भावमात्र ही करते है, प्रेम से नहीं। निश्चय ही इस पृथिवी पर व्यक्ति असंगत कार्य को देखकर खिन्न होते हैं ॥२

चाण० : क्या वे कनिष्ठ पदाधिकारी उसके कुटुम्ब हैं ?

सूर्या० : नहीं श्रीमन्। वे लोग तो उनके कुटुम्बी नहीं। उन लोगों ने उत्कोच एवं चाटुकारिता से उन्नति प्राप्त की है।

चाण० : इस समय राजा नन्द की क्या स्थिति है ?

सूर्या० : वह विलासी राजा तो इस समय नृत्य आयोजन तथा पानगोष्ठी में व्यस्त रहता है।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चाण० : (स्वगतम्) नृत्याङ्गना तु तत्र प्रेषिता एव। (प्रकाशम्) त्वया तत्र राजभवने गन्तव्यम्। (किमपि कर्णे निर्दिश्य) सम्प्रति गच्छतु अर्थसिद्धये।

सूर्या० : यदाज्ञापयति भवान् (इति सप्रणामं निष्क्रान्तः)

चाण० : (स्वगतम्) अनुष्ठितं मया स्वाभिमतं कार्यम्। तस्य सेनायां सोमदत्तः सेनापतिर्जातः। स तु कनिष्ठः आसीत्। अनेके वरिष्ठाः पदाधिकारिणो निरस्ताः। अस्ति सोमदत्तः तीक्ष्ण. मतिः। तस्य अप्रत्याशितेन नियुक्त्या प्रधान सेनापतिः कथ प्रसन्नो भविष्यति। साम्प्रतं सः स्वमनसा खिन्नः व्यवहारेण केवलं सेनापतिः अस्ति। समयं प्राप्य न नन्दं त्यक्ष्यतीति सम्भाव्यते। कथ न भवेदेवं मानवानां मनःस्थितिस्तु एता· दृशी एव जायते। स्वापमानात्, परस्योन्नतिदर्शनात् कनिष्ट-स्यासंभावितेनोत्कर्षेण राज्ञामनियमितकार्येण च सतां मनोऽपि खिद्यते किमुत सामान्य जनानाम्। अस्तु सम्पादित मेतादृशं कार्यं येन तस्य सर्वे पदाधिकारिणो राज्ञः सेवायाम-

---

चाण० : (स्वगत) नृत्यांगना तो वहाँ भेजी ही गयी है। (प्रकाश) तुम्हें कल राजभवन में जाना है (कुछ कान में निर्देश कर) इस समय अपनी कार्यसिद्धि के लिए जाएँ।

सूर्या० : आपकी जो आज्ञा (इस प्रकार प्रणाम के साथ निकल गया)

चाण० : (स्वगत) प्रयोजन के अनुरूप सारे कार्य सम्पन्न हो गये। उसकी सेना में सोमदत्त सेनापति हुआ है। वह तो कनिष्ठ था। अनेक वरिष्ठ पदाधिकारी निरस्त हो गये। सोमदत्त तीक्ष्ण बुद्धि का है। उसकी अप्रत्याशित नियुक्ति से प्रधान सेनापति कैसे प्रसन्न रहेगा। इस समय वह अपने मन से खिन्न केवल व्यवहार से ही सेनापति है। समय पाकर वह नन्द को छोड़ देगा। इस प्रकार की बात क्यों नहीं हो। मनुष्यों की मनःस्थिति इसी प्रकार होती है— अपने अपमान से दूसरों की उन्नति को देखकर, कनिष्ठ की असंभावित उन्नति से, राजा के अनियमित कार्य से तो सज्जनों का भी मन खिन्न हो जाता है, सामान्य जनों की तो बात ही क्या। ठीक है— इस प्रकार का कार्य सम्पन्न कर दिया गया है जिससे सभी पदाधिकारी राजा की सेवा मे अभिनय मात्र

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भिनयमेव सम्पादयिष्यन्ति न तु मनसा कार्यं सम्पादयिष्यन्ति। (प्रकाशम्) श्रुतिधर! आगच्छ।

श्रुतिधर : (प्रविश्य सप्रणामम्) आचार्य! अहमत्र उपस्थितोऽस्मि।

चाण० : पृथ्वीदत्तं शीघ्रमाहूयताम्।

श्रुति० : यथाज्ञापयति श्रीमन्! (इति सप्रणामं निष्क्रान्तः)

चाण० : (स्वगतम्) चन्द्रगुप्तस्य कृते शोभनः कालः समुपागतः। श्व एव कृषकाणामान्दोलनं, छात्राणामान्दोलनं शिक्षकाणां राज्यकर्मचारिणां आन्दोलनं किमुत सेनायामपि आन्दोलन मारप्स्यते। सर्वं सम्पत्स्यते। न तु चाणक्यस्य नीतिः निरस्ता

(ततः प्रविशति पृथ्वीदत्तेन सह श्रुतिधरः)

श्रुति० : अत्र भवान्, कुलपतिः विराजते (उभौ स्वस्वकरौ सम्पुटीकृत्य प्रणमतः)

चाण० । (दक्षिण हस्तं उत्थाय) स्वस्त्यस्तु।

पृथ्वी० : आचार्य, समुपागतोऽस्मि। का आज्ञा वर्तते।

ही दिखलायेंगे मन से कार्य सम्पादन नहीं करेंगे। (प्रकाश) श्रुतिधर! आओ।

श्रुतिधर : (प्रवेश कर प्रणाम के साथ) आचार्य, मैं यहाँ उपस्थित हूँ।

चाण० : पृथ्वीदत्त को शीघ्र बुलाओ।

श्रुति० : श्रीमान की जो आज्ञा (प्रणाम करता हुआ निकल जाता है।)

चाण० : (स्वगत) चन्द्रगुप्त के लिए अच्छा समय आ गया है। कल ही कृषकों का आन्दोलन, छात्रों का अन्दोलन, शिक्षकों का, राज्य कर्मचारियों का आन्दोलन, अधिक क्या सेना में भी आन्दोलन आरम्भ होगा। सब हो जायगा। चाणक्य की नीति कभी व्यर्थ नहीं हुई।

(इसके बाद पृथ्वीदत्त के साथ श्रुतिधर का प्रवेश)

श्रुति० : यहाँ श्रीमान् कुलपति जी हैं (दोनों अपने-अपने हाथों को जोड़कर प्रणाम करते हैं।)

चाण० : (दक्षिण हाथ उठाकर आशीर्वाद देते हैं।)

पृथ्वी० : आचार्य, मैं उपस्थित हूँ, क्या आज्ञा है।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चाण० : पृथ्वीदत्त ! आस्यताम् । (इति कुशासनं निर्दिशति)

पृथ्वी० : यथाज्ञापयति श्रीमन् (इति कुशास्तरणे तिष्ठति)

चाण० : (श्रुतिधरं प्रति) भवान् द्वारदेशे गच्छतु ।

श्रुति० : यथाज्ञापयति श्रीमन् । (इति सप्रणामं निष्क्रान्तः)

चाण० : पृथ्वीदत्त ! राजभवने त्वया कीदृशी व्यवस्था सम्पादिता ?

पृथ्वी० : राजभवने प्रायः सदस्याः अस्मत्पक्षीया एव नियुक्ताः सन्ति । गुप्तागारेऽपि अस्माकं सहचराः कार्यरताः सन्ति । किमधिकं राजा किमपि न जानाति यदेते पार्श्वस्थाः सेवकाः ममविरुद्धाः भविष्यन्ति ।

चाण० : (स्वगतम्) राजभवनसम्बद्धस्य वृत्तस्य पुष्टिर्जाता (प्रकाशम्) किमद्य रात्रौ पानगोष्ट्याः आयोजनमस्ति न वा ?

पृथ्वी० : पानगोष्ट्याः आयोजनंतु विद्यते एव, राजभवनस्थायां रंगशालायां नृत्यस्यायोजनमपि विद्यते । यत्र राजा नन्दः विशिष्ट रूपेण सम्मिलिता भविष्यति ।

चाण० : पृथ्वीदत्त ! बैठो (कुशासन निर्देश करते हैं)

पृथ्वी० : श्रीमान् की जो आज्ञा (चटाई पर बैठ जाता है ।)

चाण० । (श्रुतिधर के प्रति) आप द्वार पर जाएँ ।

श्रुति० : श्रीमान् की जो आज्ञा (प्रणाम के साथ निकल जाता है ।)

चाण० : पृथ्वीदत्त, राजभवन में तुमने कैसी व्यवस्था की है ?

पृथ्वी० : राजभवन में सदस्य प्रायः हमलोगों के ही पक्ष के हैं । वहाँ गुप्तागार में भी हम लोगों के ही सहचर कार्यरत हैं । अधिक क्या राजा कुछ भी नहीं जानता कि मेरे पार्श्वस्थ सेवक मेरे विरुद्ध होंगे ।

चाण० : (स्वगत) राजभवन से सम्बद्ध बात की तो पुष्टि हो गयी । (प्रकाश) क्या आज रात्रि में पान गोष्ठी का आयोजन है या नहीं ?

पृथ्वी० : पान गोष्ठी का आयोजन तो है ही, राजभवन स्थित रंगशाला में नृत्य का भी आयोजन है, जहाँ राजा नन्द विशिष्ट रूप में सम्मिलित होंगे ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चाण० : (स्वगतम्) व्यवस्था तु कार्यसाधिका एव (प्रकाशम्) त्वं सर्वस्मिन् कर्मणि दक्षोऽसि। प्रातः त्वया तत्र स्थातव्यम्।

पृथ्वी० : यथाज्ञापयति श्रीमन्। अवश्यमेव तत्र स्थास्यामि।

चाण० : (किमपि कर्णे कथयित्वा प्रकाशम्) सम्प्रति गम्यतामर्थं सिद्धये।

पृथ्वी : यथाज्ञापयति श्रीमन् (इति सप्रणामं निष्क्रान्तः)

चाण० : (स्वगतम्) विदुषां कर्त्तव्यमस्ति यत् राज्यं प्रति राजानं प्रति वा जागरुकाः भवेयुः। अल्पज्ञाः यदि निष्क्रियाः भवन्ति तर्हि क्षन्तव्याः, परं बुद्धिमन्तो विद्वान्सः यदि दुराचारं पश्यन्ति तदा त एव दोषभाजो भवन्ति। किं मदमूर्खताऽभिमानी राजा भवन्ति। राज्ये किं भवति, प्रजाया का स्थितिः, कुत्रान्नाभावः, कुत्र पीडन, कुत्रात्याचारः इत्यजानन् राजा कथं राज्ये समासीनो भविष्यति तथा तत्र चिरं स्थास्यति? यस्मिन् राज्ये बोद्धारो अपमानिता भवन्ति किं तद्राज्यं

चाण० : (स्वगत) व्यवस्था तो कार्यसाधिका ही है। (प्रकाश) तुम सभी कार्य में दक्ष हो। प्रातः तुझे वहाँ उपस्थित रहना है।

पृथ्वी० : श्रीमान् का जो आदेश। अवश्य ही मैं वहाँ रहूँगा।

चाण० : (कुछ कान में कहकर प्रकाश) इस समय प्रयोजन सिद्धि के लिए जाएँ।

पृथ्वी० : श्रीमान की जो आज्ञा (प्रणाम के साथ निकल जाता है।)

चाण० : (स्वगत) विद्वानों का कर्त्तव्य है कि वे राज्य के प्रति या राजा के प्रति जागरूक रहें अल्पज्ञ निष्क्रिय होते हैं तब तो वे क्षमा के योग्य हैं। लेकिन बुद्धिमान् विद्वान् भी यदि दुराचार को देखते हैं तब तो वे ही दोषी होते हैं। क्या मद-मूर्खता से अभिमानी राजा होता है। राज्य में क्या होता है, प्रजा की क्या स्थिति है, कहाँ अन्न का अभाव है, कहाँ लोग पीड़ित हो रहे हैं, कहाँ अत्याचार है बिना इसे जाने राजा कैसे राज्य में बैठ सकता है तथा चिरस्थायी हो सकता है। जिस राज्य में विद्वान अपमानित होते हों क्या वह भी राज्य है। (कुछ विचार कर) जन्म से कोई राजा नहीं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

राज्यम् । (किञ्चिद्विचार्य) जन्मना कोऽपि राजा न भवति। राज्ञः कृते तु पौरुषमपि अपेक्ष्यते ! चन्द्रगुप्तः पौरुषसम्पन्नः । अयमेव अस्य राज्यस्य कृते योग्यः । एकं कार्यमवशिष्टं वर्तते । मया अद्यैव सम्पादनीयं तत्कार्यम् । (निष्क्रान्तः)

पटाक्षेपः

(चाणक्य नीति विस्तरोनाम पञ्चमोऽङ्कः समाप्तः)

होता । राजा के लिए तो पौरुष भी अपेक्षित है । चन्द्रगुप्त पौरुष सम्पन्न है । यह ही इस राज्य के लिए योग्य है । एक कार्य अवशिष्ट है । उस कार्य को आज ही सम्पन्न करना है । (निकल जाता है)

पटाक्षेप

(चाणक्य नीति विस्तर नामक पंचम अंक समाप्त)

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

षष्ठोऽङ्कः

स्थानम् : राजभवनस्थं रङ्गसदनम्। वाद्य यन्त्राणि यथास्थानं उपस्थितानि विद्यन्ते। मध्ये-मध्ये उपवर्हाः स्थापिताः सन्ति। तेषु स्वर्णसूत्रकलितः एकः उपवर्हः विशिष्टरूपेण राजते। ततः प्रावशति मृदङ्गं गृहीत्वा एकः उद्घोषकः।

उद्घोषकः : (मृदङ्गं ताडयन्) भो भो, उपस्थिताः नृत्यरसिकाः। प्रतीक्षन्तु भवन्तः क्षणमधिकम्। अल्पेनैव कालेन सा विश्रुता नृत्याङ्गना अस्मिन् मञ्चे उपस्थिता भविष्यति। (मृदङ्गं-ताडयन् निष्क्रान्तः) क्षणानन्तरं मृदङ्गं ताडयन् पुनः प्रविश्य) भो भो, नृत्यरसिकाः अपरेह्णि समागमिष्यन्ति भवन्तः। अद्य केवलं राज्ञः कृते राजपुरुषाणां च कृते नृत्यस्यायोजनमस्ति। एषा राजाज्ञा सम्प्रति निर्गता इति। मृदङ्गं ताडयन् निष्क्रान्तः।)

(ततः प्रविशन्ति विभिन्नाभिर्मुद्राभिः पञ्च षा नृत्यरसिकाः)

षष्ठ अंक

(स्थान—राजभवन स्थित रंगसदन। वाद्ययन्त्र यथास्थान उपस्थित हैं। बीच-बीच में मसनद रखे हैं। उनमें स्वर्णसूत्र से कलित एक विशिष्ट मसनद भी सुशोभित है। इसके बाद मृदङ्ग लेकर एक उद्घोषक का प्रवेश)

उद्घोषक : (मृदङ्ग बजाता हुआ) हे हे, उपस्थित नृत्यरसिको, कुछ क्षण और आप लोग प्रतीक्षा करें। कुछ ही समय में वह विख्यात नृत्यांगना इस मञ्च पर उपस्थित होगी। (मृदङ्ग बजाता हुआ निकल जाता है) (कुछ ही देरी में मृदङ्ग बजाता हुआ पुनः प्रवेश कर) हे हे नृत्यरसिकों आप लोग दूसरे दिन आयेंगे। आज केवल राजा एवं राजपुरुष के लिए नृत्य का आयोजन है। इस प्रकार की राजाज्ञा अभी निकली है (मृदङ्ग बजाता हुआ निकल जाता है)

(विभिन्न मुद्राओं में पाँच छह नृत्यरसिकों का प्रवेश)

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एकः : अये ! इदं सर्वथा अन्यायपूर्णमस्ति । अत्र वयं प्रभूतेन धनव्ययेन उपस्थिताः स्मः । नृत्यदर्शनपरिपत्रं तु सर्वेषां नृत्यरसिकानां पार्श्वे विद्यते एव । कथं नृत्यदर्शनफलं परिहरति राजा ?

द्वितीयः : एवं मित्र । राजा स्वार्थी विद्यते । सत्यमुक्तम् —

देवानाञ्च मुनीनाञ्च नृपाणां शाश्वती गतिः ।।
प्रीतिं कुर्वन्ति सर्वत्र सततं स्वार्थलिप्सया ।।१

स्वयं नृत्याङ्गनायाः नृत्यमास्वाद्य इत उच्छिष्टं दास्यतीति प्रतीयते ।

तृतीयः : अहं तु न गमिष्यामि । अस्मात् स्थानात् गमनमपि सम्मान-विरुद्धं वर्तते । कथमत्रागमनाय स्वीकृतिर्दत्ता ।

चतुर्थः : परं मित्र ! राजपुरुषा आगत्य सलगुड प्रहारैः गलहस्तं दत्वा सर्वान् निःसारयिष्यन्ति तदा किं वयं सम्मानिता भविष्यामः ?

सर्वे : (समवेतस्वरेण) न हि मित्र अस्माभिः गन्तव्यमेवास्मात् स्थानात्नोचितमत्र स्थातुम् । राजा स्वार्थी अस्ति । निन्दाया पात्रमस्ति । (इति द्विः प्रकाश्य सर्वे निष्क्रान्ताः)

एकः : अये ! यह सर्वथा अन्यायपूर्ण है । हमलोग काफी धन देकर यहाँ आये हैं । सभी नृत्यरसिकों के पास नृत्यदर्शन परिपत्र भी है । राजा नृत्यदर्शन के फल को क्यों रोकता है ?

द्वितीयः : हाँ मित्र, राजा स्वार्थी है । सच कहा गया है—
देवताओं, मुनियों एव राजाओं की शाश्वत गति है कि वे सर्वत्र सदा स्वार्थलिप्सा से ही प्रीति करते हैं ।।१
स्वयं नृत्याङ्गना के नृत्य का आस्वादन कर इधर उच्छिष्ट देगा ऐसा प्रतीत होता है ।

तृतीयः : मैं तो नहीं जाऊंगा । इस स्थान से जाना भी सम्मान विरुद्ध है । यहाँ आने के लिए क्यों स्वीकृति दी ।

चतुर्थः : लेकिन मित्र, राजपुरुष आकर लाठी प्रहार के साथ गलहस्त देकर निकाल देगा तो क्या हमलोग सम्मानित होंगे !

सभी : (समवेत स्वर में) नहीं मित्र, हमलोगों को इस स्थान से जाना ही उचित है यहां ठहरना उपयुक्त नहीं है । राजा स्वार्थी है, निन्दा का पात्र है । (इस प्रकार दो बार कहकर निकल जाते हैं ।)

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(ततः प्रविशन्ति वादकाः। ते स्वं स्वं वाद्यं गृहीत्वा स्वरसन्धानमारभन्ते। ततः प्रविशति घूर्णितनयनो राजा। राज्ञः आगमनानन्तरं सर्वे वादकाः उत्थाय स्वागतं कुर्वन्ति। राजा स्वर्णजटितमुपवर्हमवलम्ब्य तिष्ठति। वादकाः अपि तिष्ठन्ति। वाद्यध्वनिः तीव्रतरो भवति।

राजा : (स्वगतम्) कथं चिरायते नृत्यांगना। श्रूयते नृत्ये गाने च कुशला विद्यते। (ततः किंकिणीशब्दैः नियमित पादस्थापनैः ध्वनिं कुर्वन्ती नृत्यांगना प्रविशति।)

राजा : (नृत्यांगनां दीर्घतरेण दृष्ट्या वीक्ष्य स्वगतम्) इयमपूर्वा सुन्दरी। सौन्दर्येण तु प्रतीयते यदियं सुरलोकोद्भवा भवेत्। कथमिह जगति इयमुपस्थिता।

(नृत्यांगना मधुरैःस्वरैः गायति)।

इह जीवने विलासः

गानं पानं चलनं हसनं मधुमिश्रितमिह वचनम्
रसिक जनैः खलु गीतं पीतं चलितं हसितं कथितम्।

(इसके बाद वादकों का प्रवेश। वे अपने अपने वाद्य को लेकर स्वर संधान आरम्भ करते हैं। इसके बाद घूमते आँखों वाला राजा का प्रवेश) राजा के आने के बाद सभी वादक उठकर स्वागत करते हैं। राजा स्वर्णजटित उपवर्हं का सहारा लेकर बैठ जाता है। वादक भी बैठ जाते हैं। वाद्यध्वनि तीव्रतर होती है।

राजा : (स्वगत) नृत्यांगना देर क्यों कर रही है। सुनने में आता है कि यह नृत्य एवं गान में काफी कुशल है।

(नियमित पादस्थापन के साथ किंकिणी ध्वनि से युक्त नृत्यांगना का प्रवेश)

राजा : (नृत्यांगना को दीर्घतर दृष्टि से देखकर) यह अपूर्व सुन्दरी है। सौन्दर्य से तो लगता है, यह देवलोक में उत्पन्न हो। इस संसार में यह कैसे उपस्थित हो गयी।

(नृत्यांगना मधुर स्वर में गाती है।)

इस जीवन में विलास ही सब कुछ है। गान, पान, चलना, हँसना, मधुर आलाप, रसिकजनों के द्वारा गाया, पीया, चला, हँसा एवं आलाप किया जाता है।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नयन वक्रता हृदि दिशि गत्वा गृह्णाति किल पुरुषम्
सलिले गत्वा वाडशं सततं गृह्णाति ननु मत्स्यम्।
यो इच्छति सततं भुवि सुरतं तस्य च शुभदो हासः ॥
इह जीवने विलासः ॥२

राजा : (नृत्यन्तीं नृत्यांगनां दृष्ट्यामनुसरन् (स्वगतम्) अस्याः स्वरोऽपि तादृशः मधुरः। मधुवर्षिणीयम्। लावण्यं खल्वस्या मम हृदयं जर्जरं करोति।

नृत्या० : गायति - इह जीवने विलासः

गानं मधुरं पानं मधुरं, मधुरं शयनं चलनम्
सर्वं सुखदं सर्वं शुभदं यद मिलति भ्रू विलासम्।
गात्रस्पर्श सुखं नहि लब्धं व्यर्थं सर्वं विभवम्
द्राक्षा व्यर्था भवनं व्यर्थं व्यर्थो निखिलो हासः।
इह जीवने विलासः ॥३

नयन वक्रता हृदय में प्रवेश कर पुरुषों को पकड़ती है, जैसे —वंशी जल में प्रवेश कर सदा मत्स्यों को पकड़ती है। जो इस संसार में सदा सुख को चाहता है उसी का हास सुभद है। इस जीवन में मात्र विलास है। २

राजा : नाचती हुई नृत्यांगना को दृष्टि से अनुसरण करता हुआ (स्वगत) इसका स्वर भी उसी प्रकार मधुर है। यह मधु बरसाने वाली है। इसका लावण्य तो मेरे हृदय को जर्जर बना रहा है।

नृत्या० : गाती है—इस जीवन में विलास है। गान मधुर है, पान मधुर है। सोना एव चलना मधुर है। यदि भ्रू का विलास मिलता है तो सभी सुखद एवं शुभद है। जिसने गात्र स्पर्श सुख को प्राप्त नहीं किया उसके सारे विभव व्यर्थ हैं, द्राक्षा व्यर्थ है, भवन व्यर्थ है तथा सम्पूर्ण हँसी भी व्यर्थ है। इस जीवन में विलास ही सब कुछ है ॥३

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

राजा : (यथा यथा नृत्यन्ती नृत्यांगना गच्छति तथा तथा राजा स्वकीयेन दृष्ट्या अंगेन च तामनुकरोति। स्वगतम्) इदृशं स्वर्गसुखमन्यत्र दुर्लभम्।
(संकेतेन तां निकटमाह्वयति सा नृत्यन्ती राज्ञः समीपमागच्छति, पटाक्षेपः)
(ततः प्रविशति ससंभ्रमः एकः सेवकः)

सेवकः : अहो, अत्याहितम्, अत्याहितम्।
(ततः प्रविशति अपरः सेवकः)

सुकरः : मित्र दुष्कर! त्वमत्रासि, ससंभ्रमोऽसि ?

दुष्कर : मित्र, सा नृत्यांगना कुत्रगता ? राजा मूर्छितो वर्तते।

सुकरः : सत्यं, राजा मूर्छितो वर्तते। नृत्यांगना तु इतो न दृश्यते। (इतस्ततः अवलोक्य) इतोऽपि न विद्यते (किञ्चिद्विचार्य) किं राज्ञः शरीरे क्षतमपि विद्यते ?

दुष्करः : नखाघात इव क्षतं तु दृश्यते राज्ञः शरीरे।

सुकरः : सम्प्रति तस्य चिकित्सा चलति न वा ?

राजा : (जैसे जैसे नाचती हुई नृत्यांगना जाती है वैसे वैसे राजा अपनी दृष्टि एवं अंग से उसका अनुसरण करता है। (स्वगत) इस प्रकार का स्वर्ग सुख अन्यत्र दुर्लभ है। संकेत से उसे निकट बुलाता है। वह नाचती हुई समीप आती है पटाक्षेप)
(इसके बाद घबराये हुए एक सेवक का प्रवेश)

सेवक : अहो, बड़ा अनर्थ हुआ, बड़ा अनर्थ हुआ!
(इसके बाद एक दूसरे सेवक का प्रवेश)

सुकर : मित्र दुष्कर, तुम यहाँ हो और घबराये हुए हो ?

दुष्कर : मित्र, वह नृत्यांगना कहाँ गई ? राजा मूर्छित हैं।

सुकर : सचमुच, राजा मूर्छित हैं। नृत्यांगना तो इधर नहीं दीखती। (इधर उधर देखकर) इधर भी वह नहीं है। कुछ विचार कर) क्या राजा के शरीर में जख्म भी है ?

दुष्कर : राजा के शरीर में नख से कटे के समान जख्म तो दीख पड़ता है।

सुकर : इस समय उनकी चिकित्सा चलती है या नहीं ?

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दुष्कर : अहं तु चिकित्सकमन्वेष्टुमागच्छामि ।
सुकरः : तदा त्वया राजचिकित्सकस्य गृहं गन्तव्यं भविष्यति ?
दुष्करः : (विचार्य) नहि, राजचिकित्सकस्तु स्वयं रोगग्रस्तो विद्यते। अन्यं चिकित्सकमन्वेषयामि ।
सुकरः : तर्हि अन्विष्यताम् शीघ्रमेव चिकित्सकम् । अहं राजभवनं गच्छामि ? (इति निष्क्रान्तः)
दुष्करः : (स्वगतम्) कुत्रप्राप्नोमि चिकित्सकम् (इतिभ्रमन्) राजाऽपि विलासी विद्यते। अद्यगानम्, अद्यनृत्यम्, अद्य पानम् (किञ्चिद्विचार्य) परं राज्ञः एतादृशीअवस्था तु पान कालेऽपि न आगच्छतिस्म ! अस्य अवस्था तु चिन्तनीया विद्यते । प्रतीयते नृत्यांगना छलेन प्रेषिता भवेत् । (इतस्ततः भ्रमति)
(ततः प्रविशति एकां पेटिकां गृहीत्वा वैद्यराजः)
दुष्करः : (वैद्यराज दृष्ट्वा, स्वगतम्) चिकित्सकोऽयमिति प्रतीयते । पृच्छामि तावत् (प्रकाशम्) किं भवान् राजवैद्यः ।
हारकः : नाऽहं राजवैद्यः । अहमस्मि वैद्यराजः ।
दुष्करः : किन्नाम धेयोभवान् ?

दुष्कर : मैं तो चिकित्सक को खोजने के लिए ही यहाँ आया हूँ ।
सुकर : तब तो तुझे राज चिकित्सक के घर जाना होगा ।
दुष्कर : (विचार कर) नहीं, राजचिकित्सक तो स्वय रोगग्रस्त हैं। दूसरे चिकित्सक को खोजता हूँ ।
सुकर : तब तो शीघ्र ही चिकित्सक को खोजो । मैं राजभवन जाता हूँ । (इस कार वह निकल जाता है।)
दुष्कर : (स्वगत) कहाँ चिकित्सक को पाऊँगा । (घूमता हुआ) राजा भी विलासी है । आज गाना, आज नृत्य, आज पान (कुछ विचार कर) लेकिन राजा की ऐसी अवस्था तो पान काल में भी नहीं होती है । इसकी अवस्था तो चिन्तनीय है । लगता है नृत्यांगना छल से भेजी गयी हो । (इधर-उधर घूमता है)
(इसके बाद पेटी लिए वैद्यराज का प्रवेश)
दुष्कर : (वैद्यराज को देखकर स्वगत) क्या आप राजवैद्य हैं ?
हारक : मैं राजवैद्य नहीं हूँ । मैं वैद्यराज हूँ ।
दुष्कर : आपका क्या नाम है ?

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

हारकः : को न जानाति मम नाम। अहमस्मि वैद्यराज हारकः। रोगिणां रोगं हरामीति हारकः, इतः औषधं हरामीति हारकः, रोगिणां वित्तं हरामीति हारकः, नारीणां चित्तं हरामीति हारकः, रोगिणां प्राणान् हरामीति हारकः। किं मम चिकित्सायां संदेहः ? मम चिकित्सया रोगी अस्मिन् लोके तु तिष्ठत्येव यदाकदा अपरस्मिन् लोकेऽपि चिरं तिष्ठति। नाऽहं सामान्य चिकित्सकः।

दुष्करः : वैद्यराज ! राजा सम्प्रति मूर्छितो वर्तते तस्य चिकित्सार्थं तत्र भवता गन्तव्यम्।

हारकः : (स्वगतम्) शोभनः कालः। नहि तस्य मूर्छायाश्चिकित्सा अपि तु तस्य एव चिकित्सा भविष्यति। (प्रकाशम्) अहं सर्वेषां चिकित्सां करोमि मूर्छितानां किं मृतानामपि चिकित्सां करोमि।

दुष्करः : कथं मृतानामपि चिकित्सां करोति भवान् ?

हारक : मेरा नाम कौन नहीं जानता है। मैं हूँ वैद्यराज हारक। रोगियों का रोग हरण करता हूँ अतः हारक, यहाँ औषधहरण करता हूँ अतः हारक, रोगियों का वित्त हरण करता हूँ अतः हारक, नारियों का चित्त हरण करता हूँ अतः हारक, रोगियों का प्राण हरण करता हूँ अतः हारक। क्या मेरी चिकित्सा में सन्देह है। मेरी चिकित्सा से रोगी इस लोक में तो ठहरता ही है दूसरे लोक में भी यदाकदा चिर-काल तक रहता है। मैं सामान्य चिकित्सक नहीं हूँ।

दुष्कर : वैद्यराज ! राजा सम्प्रति मूर्छित हैं उनकी चिकित्सा के लिए आपको वहां चलना है।

हारक : (स्वगत) अच्छा समय है उसकी मूर्छा की ही चिकित्सा नहीं उसकी भी चिकित्सा हो जायगी (प्रकाश) मैं सबों की चिकित्सा करता हूँ। मूर्छितों की क्या मृतकों की भी चिकित्सा करता हूँ।

दुष्कर : आप मृतकों की भी चिकित्सा करते हैं ?

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

हारकः : जीवितानां चिकित्सा तु सर्वः करोति। अहं साधारण वैद्यो नास्मि मम पितामहस्य पितामहोऽपि वैद्यराज आसीत्।

दुष्करः : तर्हि चलतु भवान् राजभवनम् (इति चिकित्सकस्य पेटिकां ग्रहीतुमिच्छति।

हारकः : तिष्ठतु तावत्। प्रथमं पेटिकायामौषधं पश्यामि। सम्प्रति अस्मिन् राज्ये औषधस्यानुकृतिः प्रचलिता वर्तते (इति पेटिकास्थमौषधं पश्यति, स्वगतम्) इदं मूर्च्छा प्रसारणमौषधम (प्रकाशम) सम्प्रति चलतु। (हारकः अग्रे गच्छति दुष्करः चिकित्सकस्य पेटिकां गृहीत्वा अनुकरोति)।

(नेपथ्ये कलकलध्वनिः)

हारकः : श्रोतुमभिनयं कृत्वा) अये! किमिदमशिन ?

(नेपथ्ये) भोजनं वस्त्रं देयमन्यया सिंहासनं हेयम्। शिक्षायां ध्यान देहि अथवा सिंहासनात् याहि। शिक्षालये जलाभावः प्रकाशाभावः अन्नाभावः वस्त्राभावः सर्वं विद्यते। शिक्षालये ध्यानं देहि अन्यथा सिंहासनात् याहि।

हारक : जीविनों की चिकित्सा तो सभी लोग करते हैं। मैं साधारण वैद्य नहीं हूँ। मेरे पितामह के पितामह भी वैद्यराज थे।

दुष्कर : तब तो आप राजभवन चलें (चिकित्सक की पेटी लेना चाहता है)।

हारक : तब तक ठहरो। पहले पेटी में औषध देखता हूँ। इस समय इस राज्य के औषध की अनुकृति चल गयी है। पेटी स्थित औषध को देखता है। (स्वगत) यह मूर्छाप्रसारण औषध है (काश) अब चलो।

(हारक आगे चलता है तथा दुष्कर चिकित्सक की पेटी लेकर अनुकरण करता है)

(नेपथ्य में कलकलध्वनि)

हारक : (सुनने का अभिनय करके) अये यह क्या है ?

(नेपथ्य में) भोजन वस्त्र दो अन्यथा सिंहासन छोड़ो। शिक्षा पर ध्यान दो अन्यथा सिंहासन से जाओ। शिक्षालय में जलाभाव, प्रकाशाभाव, अन्नाभाव, वस्त्राभाव सब कुछ है। शिक्षालय पर ध्यान दो अन्यथा सिंहासन से जाओ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दुष्करः : वैद्यराज ! प्रतीयते आन्दोलन मारब्धम् ।
हारक : किमदमान्दोलनम् ?
दुष्कर : राज्ञः विलासितायाः फलं विद्यते । मार्गोऽयं अवरुद्धो वर्तते अनेन मार्गेण चलतु भवान् (उभौ निष्क्रान्तौ ।)
(ततः प्रविशति चन्द्रगुप्तेन सह चाणक्यः अन्ये विद्वांसश्च ततः प्रविशन्ति । राजसिंहासनं रिक्तं वर्तते ।)
चाण० : (स्वगतम्) महता प्रयत्नेन सिंहासनमिदं रिक्तमभूत् । अस्य राज्यस्य कल्याणाय इदमावश्यकमासीत् (चन्द्रगुप्तं प्रति, प्रकाशम्) वत्स चन्द्रगुप्त ! सम्प्रति भवान् राजा चन्द्रगुप्तोऽस्ति । इदं राजसिंहासनमलङ्करोतु भवान् ।
चन्द्र० : भवतामाशीर्वचसा इदं स्थानं लब्धम् । यथाज्ञापयति आचार्यः (इति सिंहासनमधितिष्ठति राजछत्रं च धारयति ।)
चाण० : चन्द्रगुप्तस्य शिरसि राजमुकुटं धृत्वा विद्वद्भिः सह अभिषेक-मन्त्रं पठति—

दुष्क० : वैद्यराज ! लगता है आन्दोलन आरम्भ हो गया है ।
हारकः : यह आन्दोलन क्या है ?
दुष्करः : राजा की विलासिता का यह फल है । यह मार्ग अवरुद्ध है । इस मार्ग से आप चलें (दोनों निकल जाते हैं ।)
(इसके बाद चन्द्रगुप्त के साथ चाणक्य प्रवेश करता है । तदन्तर अन्य विद्वान् भी प्रवेश करते हैं । राज सिंहासन रिक्त है ।
चाण० : (स्वगत) महान् प्रयत्न से यह सिंहासन रिक्त हुआ है । इस राज्य के कल्याण के लिए यह आवश्यक था । (चन्द्रगुप्त के प्रति, प्रकाश) वत्स चन्द्रगुप्त ! इस समय तुम राजा चन्द्रगुप्त हो । इस राजसिंहासन को अलंकृत करो ।
चन्द्र० : आपके आशीर्वचन से यह स्थान प्राप्त हुआ है । आचार्य की जो आज्ञा । (इस प्रकार सिंहासन पर बैठता है तथा राज-छत्र सँभालता है ।
चाण० : चन्द्रगुप्त के शिर पर राजमुकुट धरकर विद्वानों के साथ अभिषेक मन्त्र पढ़ते हैं—

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्
ते ह नाकं महिमानः सचन्तयत्र पूर्वे साध्याः सन्तिदेवाः ॥४

करोतु स्वस्ति ते ब्रह्मा स्वस्ति चापि महर्षयः
सरीसृपाश्च ये श्रेष्ठास्तेभ्यस्ते स्वस्ति सर्वदा ॥५

(इति पृथ्वी धरेण गृहीतं तीर्थजलं चन्द्रगुप्तस्योपरि सिञ्चति)

चन्द्र० : (नतेन मूर्ध्ना करौ सम्पुटी कृत्य) प्रणमत्येषश्चन्द्रगुप्तः ।

चाण० : स्वस्त्यस्तु । राष्ट्रकल्याणमस्तु । अद्यः प्रभृति भवान् चन्द्रगुप्तमौर्य इति नाम्ना लोके ख्यातो भविष्यति ।

चन्द्र० : अनुगृहीतोऽस्मि । मौर्य चन्द्रगुप्तः भवतां सन्निधौ प्रतिज्ञां करोति यत् अहर्निशं राष्ट्रकल्याणाय प्रजापालनाय च ममयोगो भविष्यति । तथा च—

व्यवसायात्मिका शिक्षा, राष्ट्रे ज्ञानाभिवृद्धये ।
अनिवार्या च निःशुल्का भविष्यतीति निश्चयः ॥६

शु० य० वे०—३१।१६

देवों ने साधनभूत यज्ञ से साध्यभूत यज्ञ का पूजन किया उन महत्वशाली लोगों ने स्वर्ग प्राप्त किया, जहाँ सृष्टि-कर्ता प्रजापति आदि देव पहले से ही विद्यमान हैं ।।४

तुझे ब्रह्मा, महर्षि ण, कल्याण करें। सरीसृप आदि जितने श्रेष्ठ प्राणी हैं उन लोगों मे तुम्हें सदा कल्याण हो ।।५

(पृथ्वीधर के द्वारा रखे गये जल को चन्द्रगुप्त के शिरपर सींचता है।)

चन्द्र० : (नतमस्तक हो दोनों हाथ जोड़कर) यह चन्द्रगुप्त आपको प्रणाम करता है।

चाण० : तुम्हारा कल्याण हो, राष्ट्र का कल्याण हो, आज से आप मौर्य चन्द्रगु त के नाम से लोक में विख्यात होगे।

चन्द्र० : मैं अनुगृहीत हूँ। मौर्य चन्द्रगुप्त आपके समक्ष प्रतिज्ञा करता है कि मेरा योग दिन रात राष्ट्र कल्याण में तथा प्रजापालन में होगा। और भी—राष्ट्र में ज्ञान वृद्धि के लिए व्यावसायिक शिक्षा निःशुल्क तथा अनिवार्य होगी ऐसा मेरा निश्चय है ॥६

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तथा च—

जनकल्याणहेतोर्हि कृषिवाणिज्यकर्मणि ।
उद्योगे योजनायाञ्च वित्तं राष्ट्रस्य योक्ष्यते ।।६

चाण० : सुन्दरम् । योग्येन भोग्या महीति भवतां हस्ते राज्यमिदं समर्पयता मम मनसि नितरां प्रसन्नताऽधिगता । अस्य विस्तृत देशस्य सम्राट् भवान् राष्ट्रकल्याणाय राज्य सञ्चालन मनया अर्थशास्त्रपद्धत्या अधीतशास्त्रदृष्ट्या च करोतु (इति अर्थशास्त्रस्य पुस्तकं राज्ञः हस्ते समर्पयति)

चन्द्र० : (नतेनमूर्ध्ना सादरं गृहीत्वा स्वगतम्) इदममूल्य वस्तु सम्प्रति मया लब्धम् । (प्रकाशम्) भवतां कृपा मयि अतीव विद्यते ।

चाण० : (स्वगतम्) सम्प्रति अहमपमानरहितोऽस्मि (शिखां स्पृशन्) इयं शिखा कालसर्पिणीव नन्दराज्यं परिसमाप्य स्थिता वर्तते । अधुना अस्या बन्धनमपेक्षितम् । (शिखां पुनः स्पृशन्)

और भी—

जन कल्याण के लिए ही कृषि वाणिज्य कर्म में एव उद्योग में राष्ट्र के धन लगाये जायेंगे ।। ६

चाण० : बहुत सुन्दर ! योग्य से ही यह पृथ्वी भोग्या होती है । इस प्रकार आपके हाथ में यह राज्य समर्पित करते हुए मेरे मन में काफी प्रसन्नता हो रही है । इस विस्तृत देश के सम्राट् आप राष्ट्र कल्याण के लिए राज्य का संचालन इस अर्थशास्त्र की पद्धति से तथा पढ़े हुए शास्त्र की दृष्टि से करें । इस प्रकार अर्थशास्त्र की पुस्तक राजा के हाथ में समर्पित करता है ।

चन्द्र० : (नतमस्तक हो सादर ग्रहण कर स्वगत) यह अमूल्य वस्तु मुझे प्राप्त हुई । (प्रकाश आपकी महती कृपा मुझ पर है ।

चाण० : (स्वगत) अब मैं अपमान रहित हूँ (शिखा का स्पर्श करते हुए) यह शिखा कालसर्पिणी की भाँति नन्द राज्य को समाप्त कर स्थित है । अब इसका बन्धन अपेक्षित है । शिखा का स्पर्श करते हुए)

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ब्रह्मवाक्य सहस्त्रेण शिववाक्यशतेन च।
विष्णोरसंख्यवाक्येण शिखाबन्धं करोम्यहम् ॥७

इति शिखां बध्नान्ति। (प्रकाशम्) योग्येन प्राप्ता मही।

चन्द्र० : (साञ्जलिः) भवान् महामन्त्रीपदमलङ्कुर्वन् मम सहायको भवतु इति मे कामना।

चाण० : (स्वगतम्) ब्राह्मणानां राज्येन किम् ? तुष्टेन लोकेन ब्राह्मणा अपि तुष्टा भवन्ति। (प्रकाशम्) न मे विभवस्य कामना तथापि तव सहायतां सर्वदैव करिष्यामि।

चन्द्र० : यथा रोचते भवते। अद्य प्रभृति भवानेव अस्य राज्यस्य प्रधान मन्त्रीति ममघोषणा।

चाण० : स्वस्त्यस्तु। इदमस्तु भारतवाक्यम्।

राष्ट्रे ज्ञान समन्वितो द्विजवरः सत्यश्रमैः संयुतः
राजन्यो रिपुमर्दनश्च प्रवलः धेनुः घटोघ्नो सदा।
योषाशीलवती सुतोगुणयुतः सभ्यः सतां जायतां
काले वृष्टियुता फलेन सहिता पुष्पान्विता मेदिनी ॥८

(चन्द्रगुप्तस्य राज्याभिषेक वर्णनं नाम षष्ठोऽङ्कः समाप्तः)

(समाप्तमिदं शिखावन्धनं नाम नाटकम्)

सहस्र ब्रह्मवाक्यों से, सैकड़ों शिव वाक्यों से तथा असंख्य विष्णु वाक्यों से मैं शिखा बन्धन करता हूँ ॥७॥ इस प्रकार शिखा बाँधते हैं। (प्रकाश) पृथ्वी योग्य को प्राप्त हुई।

चन्द्र० : आप महामन्त्री का पद अलंकृत करते हुए मेरे सहायक बनें यह मेरी कामना है।

चाण० : (स्वगत) ब्राह्मणों को राज्य से क्या ? लोगों के सन्तुष्ट होने पर ब्राह्मण भी सन्तुष्ट होते हैं। (प्रकाशम्) मुझे धन की कामना नहीं है फिर भी तुम्हारी सहायता सदा ही मैं करूँगा।

चन्द्र० : आपकी जो इच्छा। आज से आप इस राज्य के प्रधान मन्त्री बनें यह मेरी घोषणा है।

चाण० : तुम्हारा कल्याण हो। यह भरत वाक्य हो—

राष्ट्र में द्विज लोग ज्ञान से समन्वित तथा सत्य एवं श्रम से युक्त हों। क्षत्रिय शत्रुमर्दन करने वाला हों, गायें काफी दूध देने वाली हों, स्त्रियाँ शीलवती हों, सज्जनों के पुत्र गुणयुक्त तथा सभा के योग्य हों, समय पर वृष्टि से युक्त होकर पृथ्वी फल एवं पुष्प से समन्वित हो ॥८

(चन्द्रगुप्त का राज्याभिषेक नामक षष्ठ अंक समाप्त)

(शिखाबन्धन नामक नाटक समाप्त)

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथ कवि-वंश परिचयः

बिहार राज्ये विख्यातो गयायां मण्डले शुभे
ग्रामोऽस्ति 'छोटिया' नाम, श्रो त्रया निवसन्ति वै ॥१

मगधेषु प्रसिद्धोऽस्ति पञ्च क्रोशेषु चोत्तमः
धन - धान्यसमृद्धोऽस्ति, दिव्यशोभा विभूषितः ॥२

श्रोत्रियशुभ्रवंशेषु, पाण्डेयोपाधिभूषिताः
अभूवन् शास्त्रतत्त्वज्ञाः, कर्मकाण्डविशारदाः ॥३

'महावीर' इति ख्यातः, तेष्वेको बुद्धिमान् बली
षड्पुत्राः कुशलास्तस्य, योग्याः धर्मरताः सदा ॥४

'नवलः' प्रथमस्तेषां, महान्तः मन्दरस्य सः
'सिद्धेश्वरो' द्वितीयोऽस्ति, नाम्ना यथार्थतः पुमान् ॥५

तृतीयो बद्रीदत्तश्च, चतुर्थो पारसस्तथा
ततो वालेश्वरः प्रोक्तः, षष्ठश्चन्द्रेश्वरः पुनः ॥६

श्रीमान् पूज्यः सततनिरतः धर्मकार्येषु धन्यः
लोकख्यातः प्रवचनरतः वेदमार्गानुरागी।
सिद्धः स्तुत्यः शुभगुणयुतः देवतुल्यो ग्रहज्ञः
विज्ञः 'सिद्धेश्वर' इति महान् यस्य पुत्रौ गुणज्ञौ ॥७

पिता सिद्धेश्वरो यस्य जननी जानकी पुनः
'रामाशीषः' कथं न स्यात्, विख्यातो बुधमण्डले ॥८

धन्यः तस्यानुजः धीरः, 'श्यामनन्दन' नामकः
पठने तीक्ष्णबुद्धिः सः लोककार्येषु चाग्रगः ॥९

रामाशीषः कविश्रेष्ठः, वसति मातृसद्मनि
नालन्दायाः जैतीपुर्यां, साम्प्रत भ्रातृसंयुतः ॥१०

वेदवेदग्रहाब्जाब्दे[1] सत्कुले समजायत
ग्रामे प्रारंभिकीं शिक्षां, प्राप्तवान् स विचक्षणः ॥११

१— १९४४ ई०

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ग्रामे श्रीनगराख्ये च नालन्दा मण्डले शुभे
वसति कविवरः सोऽयं श्वश्रूगृहे सुतान्वितः ॥१२

बच्ची देवीति विख्याता पत्नी तस्य पतिव्रता
मात्रा संरक्षिता याऽस्ति वाल्ये पितृगृहे शुभे ॥१३

वालात् संरक्षितो योऽस्ति नागैर्दिव्यफणैः शुभैः
'सुबोध नाम्नः पुत्रकः सन्तोषापर नामकः ॥१४

सौख्याभिवर्धको भव्यः शोभनः सुमनोहरः।
प्रबोध नाम्नः पुत्रोऽस्ति द्वितीयः शुभलक्षणः ॥१५

तिस्रः कन्याः शुभा यस्य. पुत्रौ द्वौ कुलदीपकौ
सदाचाररताश्चान्ये बान्धवा धर्मतत्पराः ॥१६

साहित्ये शब्दशास्त्रे च वेदे चापि विधानतः
यत्नतोऽधीतिमासाद्य आचार्यत्वमवाप्तवान् ॥१७

हिन्द्यां संस्कृतभाषायां कृतभूरिपरिश्रमः
उत्तीर्य प्रथमे वर्गे एम०ए० डिग्रीं स लब्धवान् ॥१८

अन्वेषणं स सम्पाद्य निरुक्ते लब्धवान् पुनः
शोधोपाधिञ्च पी-एच०डीं० वेदाङ्गे चाति विस्तृते ॥१९

वेदद्वीपग्रहाब्जाब्दे[1], देववाण्यां निर्निर्मितम्
'मयूखदूतं' यत्काव्यं गीतिकाव्येषु चोत्तमम् ॥२०

मन्त्रस्य पाठे विकृतेः प्रधाने, वेदस्य राज्येन स राजगेहे
आयोजितायां प्रतियोगितायां, मुद्रासहस्रेण पुरस्कृतोऽस्ति ॥२१

द्वीपद्वीपग्रहाब्जाब्दे[2] कर्णार्जुनीयमद्भुतम्
नाटकं परमं दिव्यं ग्रथितं सुमनोहरम् ॥२२

चक्षुर्वसु ग्रहाब्जाब्दे[3] शिखाबन्धननाटकम्
चाणक्यवृत्तमासाद्य, द्वितीयं रचितं पुनः ॥२३

१—१९७४ ई०, २—१९७७ ई०, ३—१९८२ ई०

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्लोकानुक्रमणिका

श्लोकाः	अङ्काः	श्लोक संख्याः	पृष्टाङ्काः	श्लोकाः	अङ्काः	श्लोक संख्याः	पृष्ठाङ्काः
आज्ञां यो नहि	३	७	४६	न राज्येन न	३	९	४६
उत्तमेनाथ कार्येण	२	४	२०	नाम्नासम्बो	३	१५	५१
करोतु स्वस्ति	६	५	८८	निद्रामानवतीव	३	१	३५
कुट्यः पंक्तिषु	४	८	६४	निमन्त्रणं विना	२	१०	३२
कुटिलः कृष्ण	२	९	३१	निशायां प्राप्तायां	४	१	५५
कुर्वन्नेवेह	४	५	६२	पण्डितानां हि	२	८	२४
गच्छतात् तत्तमः	४	१०	६२	पण्डिता मान	२	११	३३
गानं पानं चलनं	६	२	८१	पादपस्यैध	३	८	४६
गानं मधुरं	६	३	८२	पुत्रस्याभ्युदयं	१	१०	१०
गुरवः सम्मानिता	२	७	२२	पुनन्तुमादेव	३	१०	४९
गोदुग्धैर्हविषा	३	६	४५	प्रजानामिह	२	५	२१
चन्दनं परमं दिव्यं	३	११	५०	प्रभुत्वमविवे	२	१३	३३
चाटुकारावृतो	५	१	६९	ब्रह्मवाक्य सहस्रेण	२	१५	३३
चिन्तायां निरता	३	२	३६	ब्रह्मवाक्य—	६	७	९०
ज्ञान मार्गेण	४	१२	६७	बीजानां पतनं क्षेत्रे	१	११	११
ज्ञानं सम्पूर्णतां	४	६	६२	बुद्धिमन्तो हि	२	१२	३३
ज्ञानार्जनमिहा	४	३	६०	बुभुक्षितैर्व्याकरणं	४	४	६१
ज्ञानशून्या जनाः	४	९	६६	भटः प्रतिभटाः	३	५	४१
द्यौः शान्तिः	१	३	४	मार्गात्कण्टकिनो	१	१३	१४
दर्भाङ्कुराणि	१	१२	१२	मेधां मे वरुणो	१	५	५
देवानाञ्च	६	१	८०	यज्ञेनयज्ञमयजन्त	३	१२	५०
धर्मशून्योऽपि	२	६	२१	,,	६	४	८८

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्लोकाः	अङ्काः	श्लोक संख्याः	पृष्ठाङ्काः	श्लोकाः	अङ्काः	श्लोक संख्याः	पृष्ठाङ्काः
यथा विश्वमिदं	१	२	१	विद्यादानात्	३	१४	५१
यां मेधां देवगणाः	१	६	५	वृत्तिः राज्यहिता-	३	४	४१
ये सेनापतयो	२	३	७३	वृक्षाः पंक्तिषु	४	७	६३
यो मन्वे भुवि	१	१	१	व्यवसायात्मिका—	६	६	८८
योगः पुण्यमयः	३	३	३०	शासको द्वेषरागैः	४	११	६७
राज्ञः नन्दस्य	२	१४	३३	श्रेयश्च प्रेयश्च	१	७	७
राज्यमेतद्भवेत्	४	३	६७	सत्यं जीर्णेषु सर्पेषु	४	२	५६
राष्ट्रे ज्ञान सम०	६	८	९०	स्वस्तिनः इन्द्रो	१	४	४
रोगः शरीरस्थ	१	८	८	समूलमुन्मूलन	१	९	८
रोगस्य नाशने	१	१४	१५	सूक्ष्मेक्षणयुते	३	१३	५१
वासस्तत्रैव	२	१	१७	स्वाभाविकस्य	५	२	६९
विदुषामादरं	२	२	२०	हेयोदोषी सदा	२	२	१८

□

शुद्धिपत्रम्

पृष्ठे	पंक्तौ	अशुद्धम्	शुद्धम्	पृष्ठे	पंक्तौ	अशुद्धम्	शुद्धम्
२	:	आगव्यताम	आगम्यताम	८	११	प्रसन्नोअस्मि	प्रसन्नोऽस्मि
३	३	प्रकाशम	प्रकाशम्	९	४	चाणक्यादयो	चाणक्यादयः
३	९	अभ्यासो	अभ्यासः	१२	१०	न्याभाति	न्याभान्ति
३	९	ब्रह्मचारीणां	ब्रह्मचारिणां			तिरोहितांन	तिरोहितानि
३	१५	प्रस्तानिाप	प्रस्तावनापि	१६	१३	प्रभुवर्यानां	प्रभुवर्याणां
६	२	प्रचाररण	प्रचारण	१७	१५	बधा	बुधा
८	३	रागः	रोगः	१८	३	पादत्बुधैः	पादाद्बुधैः
		लघुगुरुर्वा	लघुर्गुरुर्वा	१८	११	इदमासनम	इदमासनम्
		नोपेक्षणीय	नोपेक्षणीयः	१९	२	तस्या	तस्याः
८	९	कर्त्तय	कर्त्तव्यः	१९	७	राज्ञां	राज्ञो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पृष्ठे	पंक्तौ	अशुद्धम्	शुद्धम्	पृष्ठ	पंक्तौ	अशुद्धम्	शुद्धम्
१९	१४	सत्कार-विशेष	सत्कार-विशेषं	५८	६	ब्रह्मचारिण	ब्रह्मचारिणं
				५९	१२	कथ	कथं
२१	२	रास्यास-नस्थो	राज्यासनस्थो	६०	१३	अन्तेवासिनो-तादृशाः	अन्तेवासिन-स्तादृशाः
२२	१	गुरवो	गुरवः	६१	७	ब्रह्मचारिणो	ब्रह्मचारिणः
२२	६	श्रुतिधर	श्रुतिधरः	६१	९	,,	,,
२२	११	कार्यकतृनां	कार्यकर्तृणां	६२	१	जिजीविषे-दृशतं	जिजीवि-षेच्छतं
२५	३	युक्तोखंजः	युक्तः खञ्जः	६२	४	विद्यार्थीनां	विद्यार्थिनां
२६	१५	अम्या	अस्यां	६३	१४	प्रसीददन्तः	प्रसीदत्यन्तः
२७	१३	अनुदघाटिने	अनुद्घाटिते	६४	१०	किम	किम् ?
२८	४	शिथिलं पानीयसदृशं	शिथिला पानीयसदृशी	६५	१	उपदेशच-लति	उपदेशश्च-लति
२८	१२	मन्त्रिण	मन्त्रिणं	६६	१५	वीरभाग्या	वीरभोग्या
२९	६	वेषते	वेपते	६६	१६	वं रकमि-युवा	वीरकर्मायुवा
३३	११	प्रभृतिमारभ्य	प्रभृतिप्रारभ्य				
३४	५	स्पर्शन	स्पृशन्	६७	१	रागद्वेषैः	द्वेषरागैः
३६	३	प्राणाञ्च मुद्धताः	प्राणाँश्च मुद्यताः	६९	१०	राजयानस्य	राज्ययानस्य
				७२	२	सूर्ययिनो	सूर्यायिनः
३६	८	नायको-अन्वेष्टव्य	नायकोऽ-न्वेष्टव्यः	७३	८	कुशलिनो विरक्तं	कुशलिनः विरक्तिं
३८	८	रुचिकरेयं	रुचिकरीयं	७३	९	ह्यसगतं	विसगतं
४२	७	,,	,,	७४	१०	न	स
४३	१३	पदाधिका-रीणां	पदाधिका-रिणां	७६	१४	सम्मिलिता	सम्मिलितो
				७७	१२	भवन्ति	भवति
४५	२	परीक्षाम्यहं	परीक्षयाम्यह	७७	१४	वोद्धारो-अपमानिताः	वोद्धारोऽप-मानिताः
४५	११	गोदुग्धैहृ-विषा	गोदुग्धैर्हृ-विषा	८१	१	दीर्घतरेण	दीर्घतरया
				८१	१	किल	प्रिय
४६	१५	केवलम	केवलम्	८२	२	ननु	स्विन्
४७	५	अनुभूत	अनुभूत	८२	१०	यद	यदि
५२	३	धर्मवसो	धर्मधरस्य	७४	१३	वैद्यराज	वैद्यराजं
५२	१०	चक्रवर्त्ती	चक्रवर्ति	८६	७	औषधम	औषधम्
५३	११	कार्यस्य-भावः	कार्यस्या-भावः	८६	८	प्रकाशम	प्रकाशम
				८६	१३	ध्यान	ध्यानम्
५६	१	विषमौत्क-ट्य	विषस्यौत्क-ट्य	८७	१०	अलकरोतु	अलंकरोतु
				८८	१	धमाणि	धर्माणि

□

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आगत क्रमांक......२१६५
दिनांक..........................

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

लेखकस्यान्याः कृतयः

१ मयूखदूतम् : खण्डकाव्यम्
२ कर्णार्जुनीयम् : नाटकम् (यन्त्रस्थम्)
३ कृष्णोदयम् : महाकाव्यम् (अप्रकाशितम्)
४ निरुक्तस्य भाषावैज्ञानिकमालोचनात्मकञ्चाध्ययनम् (पी-एच०डी० शोधप्रबन्धः (अप्रकाशितः।
५ यास्कीय निर्वचनानां भाषावैज्ञानिकमालोचनात्मकञ्चाध्ययनम् : (अप्रकाशितम्)
६ कालिदासस्य काव्येषु राष्ट्रभावना : शोधलेखः
७ मेघदूते अश्लीलत्वारोपः ,,
८ कालिदासस्य काव्येषु मधुमासः ,,
९ कालिदासस्य काव्येषु परिवार कल्याणम् ,,
१० संस्कृत साहित्ये वर्षावर्णनम् ,,
११ कालिदासस्य मगधं प्रति विशेषानुरागः ,,
१२ वेदाङ्गेषु निरुक्तस्य स्थानम् ,,
१३ महाकवि कालिदासस्य महावैदिकत्वम् ,,
१४ निरुक्तं ध्वनिपरिवर्तनञ्च ,,
१५ कालिदासस्य काव्येषु षडङ्गस्थानम् ,,
१६ निरुक्ते शब्द तत्त्वम् ,, (अप्रकाशितः)
१७ कालिदासस्य काव्येषु क्रीडा ,, ,,
१८ मृच्छकटिकस्य भाषिकी संरचना ,, ,,

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri